सुभाषित व्याकरण - २४

Subhāṣita Vyākaraṇa - 24

(A compilation of Saṃskṛta well said verses with full grammar and meaning)

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

रविवार माघ शुक्ल प्रतिपदा १९४४ , शुभकृत संवत्सर

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः॥१०६॥- courtesy शारदाप्रकाश-संघ

पठतः मूर्खत्वम् न अस्ति। जपतः पातकम् न अस्ति। मौनिनः कलहः न अस्ति (तथा) जाग्रतः भयम् च न अस्ति ॥

A well-read person is not stupid. A devotee, saying his prayers, is sinless. A quiet person does not quarrel. An alert person is not afraid.

पठतः, जपतः & जाग्रतः- all in- पु. लिं. ष. वि. ए. व. of पठत्- engaged in studies- (पठ्- पठति १ ग. प. प. to read, recite, rehearse), जपत्- engaged in prayers- (जप्- जपति-to mutter prayers, repeat internally) & जाग्रत्- one who is alert, awake- (जागृ- जागर्ति २ ग. प. प. to be awake, to be watchful, attentive)- all वर्त. का. वा. धा. सा. वि., मूर्खत्वम्- stupidity, foolishness- त्व- suffix implies quality, nature- (मूर्ख- stupid, dull, silly)- पातकम्- sin, crime & भयम्- fear, dread, apprehension- all in न. लिं. प्र. वि. ए. व., मौनिनः- in- पु. लिं. ष. वि. ए. व. of- मौनिन्- adjctv- one who keeps silence- (मौनम्- silence)- all in- न. लिं. प्र. वि. ए. व., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, कलहः- Quarrel, पु. लिं. प्र. वि. ए. व., च- and, न- no, not- अव्ययs

यस्तात न क्रुध्यति सर्वकालं भृत्यस्य भक्तस्य हिते रतस्य।
तस्मिन्भृत्या भर्तरि विश्वसन्ति न चैनमापत्सु परित्यजन्ति ॥१०७॥-महाभा उद्योगपर्व ३७.२०

तात, यः भक्तस्य भृत्यस्य, सर्वकालम् हिते रतस्य, न क्रुध्यति, तस्मिन् भर्तरि भृत्याः विश्वसन्ति (तथा) च एनम् आपत्सु न परित्यजन्ति॥

Oh dear, (Oh King), the servants develop confidence (faith) with their master who never gets angry with his devoted servant and who is all the time engaged in his welfare and they do not desert him in the time of his misfortune (troubles).

तात- Oh, dear, blessed one- पु. लिं. सं. वि. ए. व., यः (यद्)- पु. लिं. प्र. वि. ए. व. भक्तस्य, रतस्य & भृत्यस्य- all in- पु. लिं. ष. वि. ए. व. of भक्त- devoted, attached, one who worships- क. भू. धा. वि. of भज्- भजति-ते १ ग. उ. प. to be devoted to, attached to, to worship, रत- engaged, fondly attached, pleased- क. भू. धा. वि. of रम्- रमते १ ग. आ. प. to be engaged, attached, pleased & भृत्य- servant, dependent, required to be supported- also भरणीय & भरितव्य- क. वि. धा. सा. वि. of भृ- भरति- ते १ ग. उ. प. & बिभर्ति- बिभृते ३ ग. उ. प. to support, bear, fill, सर्वकालम्- all the time- सर्वम्- all, entire, whole, कालम्- time, period- सर्वम् कालम्- विशेषणपूर्वपदकर्मधारय स.- हिते- न. लिं. स. वि. ए. व. of हितम्- welfare, good, proper- हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, discharge, send forth, क्रुध्यति- वर्त. तृ. पु. ए. व. of क्रुध्- ४ ग. प. प. to be angry, तस्मिन् & भर्तरि- पु. लिं. स. वि. ए. व. of तद्- he & भर्तृ- supporter, provider, husband, lord, भृत्याः- पु. लिं. प्र. वि. ब. व. of भृत्य- see above, एनम्- him- द्वि. वि. ए. व. of इदम्- he, आपत्सु- स्त्री. लि. स. वि. ब. व of आपद्- calamity, trouble, misfortune, विश्वसन्ति & परित्यजन्ति-

वर्त. प्र.. पु. ब. व. of वि+ श्वस्- to have confidence, to believe- (श्वस्- श्वसिति २ ग. प. प. to breathe, to respire) & परि+ त्यज्- abandon fully, leave- (त्यज्- त्यजति- १. ग. प. प. to forego, abandon), न- no, not, च- and- both अव्ययs

न तल्लोके द्रव्यमस्ति यल्लोकं प्रतिपूरयेत् ।
समुद्रकल्पः पुरुषो न कदाचन पूर्यते ॥१०८॥ -- महाभा- अनुशासनपर्व १३.९४.२९

न तद् लोके द्रव्यम् अस्ति यद् लोकम् प्रतिपूरयेत्। पुरुषः समुद्रकल्पः (भवति)। (सः) न कदाचन पूर्यते।

There is no wealth on this earth, which can fulfil all his desires. A man is like an ocean, which can never get fully filled.

तद्- that, it, द्रव्यम्- wealth, a substance, material to work upon, यद्- which- all in न. लिं. प्र. वि. ए. व., लोके- स. वि. & लोकम्- द्वि. वि.-both पु. लिं ए. व. of लोकः- the world, earth, the people, human race, प्रतिपूरयेत्- विध्यर्थ तृ. पु. ए. व. of प्रति+ पूर्- to completely fill- (पूर्- ४ ग. आ. प. to fill, fill out), पुरुषः- a man, human & समुद्रकल्पः- समुद्र- sea, ocean, कल्पः- one which is similar to, like, a very good alternative- समुद्रस्य कल्पः- समुद्रकल्पः- ष. तत्पुरुष स.- both in पु. लिं. प्र. वि. ए. व., पूर्यते & अस्ति- वर्त. प्र. पु. ए. व. of पूर्- ४ ग. आ. प.- see above & अस्- २ ग. प. प. to be, to exist, न- no, not, कदा- when, at what time, कदा+ चन- sometimes, rarely, न कदाचन- never- all अव्ययs

कृमिकुलचितं लालाक्लिन्नं विगन्धिजुगुप्सितं
निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शंकते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥१०९॥ -भर्तृहरिनीतिशतकम् ९

क्षुद्रः जन्तुः परिग्रहफल्गुताम् न हि गणयति । (यथा) श्वा कृमिकुलचितम्, लालाक्लिन्नम्, विगन्धिजुगुप्सितम्, निरुपमरसम्, निरामिषम्, नरास्थि प्रीत्या खादन्, पार्श्वस्थम् सुरपतिम् अपि विलोक्य न शंकते॥

A mean person, (while going about his work) does not bother about repulsive environmental conditions around him. A dog, happily devouring a human bone, infested with worms, soaked in its saliva, with disgusting smell, devoid of any taste and without any flesh over it, without any hesitation, even after looking at King of Gods, standing beside him.

क्षुद्रः- adjctv- mean, low,, small, जन्तुः- a creature, living being, man, श्वा- (श्वन्)- a dog & खादन्- eating, devouring- वर्त. का. वा. धा. सा. वि. of खाद्- खादति १ ग. प. प. to eat, devour- all in- पु. लिं. प्र. वि. ए. व. परिग्रहफल्गुताम्- स्त्री. लिं. द्वि. वि. ए. व., परिग्रहफल्गुता- surrounding meanness- परिग्रह- surrounding, circumstantial, फल्गुता- meanness, uselessness- (फल्गु-adjctv- small, mean, useless)- परिग्रहस्य फल्गुता- परिग्रहफल्गुता- ष. तत्पुरुष स., गणयति- वर्त. प्र. पु. ए. व. of गण्- गणयति- ते १०

ग. उ. प. to count, take into account, कृमिकुलचितम्- infested with worms- कृमिः- स्त्री. लि.- a worm, कुलचितम्- fully covered, infested- क. भू. धा. वि. of कुल+ चि- to fully cover, infest- (चि- चिनोति- ५ ग. प. प. to collect, gather- कृमिभिः कुलचितम्- कृमिकुलचितम्- तृ. तत्पुरुष स., लालाक्लिन्नम्- soaked in saliva- लाला- saliva, spittle- क्लिन्नम्- wet, moistened- क्लिन्न- क. भू. धा. वि. of क्लिद्- क्लिद्यति ४ ग. प. प. to become wet- लालया क्लिन्नम्- लालाक्लिन्नम्- तृ. तत्पुरुष स., विगन्धिजुगुप्सितम्- disgusting due to bad smell- विगन्धिन्- dirty smelling- गन्ध- smell, odour, गन्धिन्- smelling, वि- अव्यय- affix implies adverse, intense, जुगुप्सितम्- disliked (जुगुप्सा-dislike, aversion)- विगन्धिना जुगुप्सितम्- तृ. तत्पुरुष स., निरुपमरसम्- (निर्+ उपमरसम्)- devoid of any comparable taste- निर्-अव्यय- affix implies devoid of, उपमा- resemblance, comparison, रसम्- taste- उपमा रहितम् रसम् यद् तद्- निरुपमरसम्- बहुव्रीही स., निरामिषम्- without any flesh- आमिषम्- flesh, आमिषेण रहितम्- निरामिषम्- तृ. तत्पुरुष स ., नरास्थि- human bone- नर- man, human- अस्थि- न. लि.- a bone- नरस्य अस्थि- नरास्थि- ष. तत्पुरुष स.- all in न. लिं. द्वि. वि. ए. व., प्रीत्या-स्त्री. लिं. तृ. वि. ए. व. of प्रीति- pleasure, happiness, पार्श्वस्थम् & सुरपतिम्- both in पु. लिं. द्वि. वि. ए. व. of पार्श्वस्थः- standing by the side- पार्श्व- side- पार्श्वे तिष्ठति इति- पार्श्वस्थः- उपपद तत्पुरुष स. & सुरपतिः- Lord of Gods- इन्द्रः- सुरः- God, पतिः- master, lord, husband- सुराणाम् पतिः- सुरपतिः- ष. तत्पुरुष स., विलोक्य- after looking at- पू. का. वा. ल्यबन्त धा. सा. अव्यय of वि+ लोक्- to see, look at- (लोक्- लोकते १ ग. आ. प.- to see) शंकते- वर्त. तृ. पु. ए. व. of शंक्- १. ग. आ. प. to doubt, hesitate न- no, not, हि- surely, indeed, अपि- even-all अव्यय

किञ्चिदेव ममत्वेन यदा भवति कल्पितम् ।
तदेव परितापार्थं नाशे सम्पद्यते पुनः ॥११०॥ -महाभा शान्तिपर्व १२. २७६. ८

(यद्), किञ्चित् ममत्वेन कल्पितम् भवति एव, तद्, यदा नाशे सम्पद्यते, परितापार्थम् एव पुनः (भवति) ॥

The object or person, with which one has developed certain affection, when lost, again becomes cause of his extreme sorrow.

किञ्चित्- (किम् चित्)- something, anything, कल्पितम्- formed, arranged, considered, fashioned- (कल्पित- प्रयोजक क. भू. धा. वि. of क्लृ- कल्पयते- to arrange, consider- क्लृ- कल्पते १ ग. आ. प.to bring about, accomplish), तद्- that, it & परितापार्थम्- a cause for anguish, agony- परिताप- wailing, lamentation, extreme heat, pain, agony, anguish & अर्थम्- purpose, reason, meaning- परितापस्य अर्थम्- परितापार्थम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., ममत्वेन- in न. लिं. तृ. वि. ए. व. of ममत्वम्- sense of owning, belonging, attachment, pride, भवति & सम्पद्यते both- वर्त. प्र. पु. ए. व. of भू- १ ग. प. प. to be, to exist, to become & सम्+ पद्- to turn out, become, arise, produce - (पद्- पद्यते ४ ग. आ. प. to go, attain, gain), नाशे- पु. लिं. स. वि. ए. व. of नाशः- destruction, ruin, loss, death, यदा- when, at the time, as soon as, पुनः (पुनर्)- again, anew, once more, एव- just, mere, only- all अव्ययs

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयाऽऽगमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।
तज्जाड्यं वसुधाधिपस्य कवयस्त्वर्थं विनाऽपीश्वराः
कुत्स्यास्स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः॥१११॥ - भर्तृहरिनीतिशतकम् १५

शास्त्रोपस्कृतशब्दसुन्दरगिरः, शिष्यप्रदेयागमाः, विख्याताः कवयः यस्य प्रभोः विषये निर्धनाः वसन्ति, तद् वसुधाधिपस्य जाड्यम् (भवति) । कवयः तु विना अर्थम् अपि ईश्वराः (भवन्ति)। कुपरीक्षकाः कुत्स्याः स्युः, न मणयः यैः (ते) अर्घतः पातिताः (सन्ति)।

If famous scholars who write grammatically perfect words with beautiful composition and with wisdom worthy of imparting to their disciples, live in poverty in any kingdom, then it is due to apathy of the king alone. The scholars are masters even without having any formal wealth. Here the blame lies on incompetent examiners (the Kings), who failed to recognise the worth of the gems.

शास्त्रोपस्कृतशब्दसुन्दरगिरः, शिष्यप्रदेयागमाः, विख्याताः कवयः, निर्धनाः, ईश्वराः, कुपरीक्षकाः, कुत्स्याः, मणयः & पातिताः- all in पु. लिं. प्र. वि. ब. व. of शास्त्रोपस्कृतशब्दसुन्दरगिर्- grammatically perfect words with beautiful composition- -शास्त्र- any department of knowledge, sacred treatise, उपस्कृत- prepared, collected- क. भू. धा. वि. of उपस्कृ- to perfect, prepare- (कृ- ८ ग. उ. प. to do), शब्द- word, sound, सुन्दर- beautiful, charming, गिर्- स्त्री. लिं.- speech, language-शास्त्रैः उपस्कृता- शास्त्रोपस्कृता- तृ. तत्पुरुष स. & सुन्दराः शब्दाः - शब्दसुन्दराः- विशेषणोत्तरपदकर्मधारय स., शास्त्रोपस्कृताः च शब्दसुन्दराः च- शास्त्रोपस्कृतशब्दसुन्दराः - द्वंद्व स. & शास्त्रोपस्कृतशब्दसुन्दराः गिरः येषाम् ते- शास्त्रोपस्कृतशब्दसुन्दरगिरः- बहुव्रीही स., शिष्यप्रदेयागमः- knowledge (precept) worthy of imparting to the disciples- शिष्य- student, disciple, प्रदेय- worth giving, to be imparted, given- क. वि. धा. सा. वि. of प्र+ दा- to grant, give- (दा- यच्छति १ ग. प. प. to give), आगमः- knowledge, sacred learning- शिष्याय प्रदेयम्- शिष्यप्रदेयम्- च. तत्पुरुष स. & शिष्यप्रदेयः आगमः- विशेषणपूर्वपदकर्मधारय स., विख्यातः- famous, renowned- क. भू. धा. वि. of वि+ ख्या- to be well-known- (ख्या- ख्याति- २ ग. प. प. to tell, declare), कविः- poet, scholar, writer in general, निर्धनः- poor, having no wealth- धनम्- wealth, money- निर्धन: - निर्गतं धनं यस्मात् सः - प्रादि बहुव्रीहि स., ईश्वरः- lord, master, कुपरीक्षकः- incompetent examiner- कु- अव्यय- affix implies bad, poor, परीक्षकः- examiner, tester, कुत्सितः परीक्षकः- कुपरीक्षकः- प्रादि कर्मधारय स., कुत्स्यः- to be condemned, censured- (also कुत्स्यनीय & कुत्स्यितव्य)- क. वि. धा. सा. वि. of कुत्स्- कुत्सयति- ते १० ग. उ. प., मणिः- gem & पातितः- made to fall down, brought down- पातित- क. भू. धा. वि. of प्रयोजक of पत्- पातयति- ते -(पत्- पतति १ ग. प. प. to fall, drop), यस्य, प्रभोः & वसुधाधिपस्य- all in पु. लिं. ष. वि. ब. व. of यद्- who, प्रभुः- master, lord, owner, ruler & वसुधाधिपः- King- वसुधा- land, earth, ground, अधिपः- lord, master- वसुधायाः अधिपः- वसुधाधिपः- ष. तत्पुरुष स, विषये- in पु. लिं. स. वि. ए. व. of विषयः- land, country, वसन्ति- वर्त. प्र. पु. ब. व. of वस्- वसति १ ग. प. प. to dwell, live, stay, तद्- that, it, जाड्यम्- sluggishness, apathy, inactivity & अर्थम्- wealth, money- all in न. लिं. प्र. वि. ए. व., स्युः- विध्यर्थ प्र. पु. ब. व. of अस्- अस्ति २ ग. प. प. to be, to exist, यैः- पु. लिं. तृ. वि. ब. व. of यद्- who, अर्घतः- from getting the price- (अर्घः- price, value & तस्- suffix implies 'from', towards), तु- but, on the other hand, न- no, not, विना- without, devoid of, अपि- also, even- all अव्ययs

धर्मः सत्यं तथा वृत्तं बलं चैव तथाप्यहम् ।
शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः ॥११२॥ -महाभा- शान्तिपर्व १२.१२४.६२

महाप्राज्ञ, धर्मः, सत्यम् तथा वृत्तम् बलम् च एव तथा अपि अहम् सदा शीलमूला (भवन्ति)। अत्र संशयः न अस्ति॥

(Said by लक्ष्मी to प्रह्लाद)

Oh great intellectual, the right way of living (per one's Dharma), truthful conduct and good behaviour, strength and myself (wealth-लक्ष्मी) are always based on the character of a person. In this respect, there is no doubt at all!

महाप्राज्ञ- Oh great learned man- पु. लिं. सं. वि. ए. व.- महान्- great, mighty & प्राज्ञ- adjctv- intellectual, wise, learned- महाप्राज्ञः- यस्य प्रज्ञा महान् अस्ति सः - बहुव्रीहि स., धर्मः- right way of living per owns assigned duties. & संशयः- doubt, hesitation, uncertainty, indecision- both in पु. लिं. प्र. वि. ए. व., सत्यम्- truth, honesty, वृत्तम्- behaviour, character, बलम्- strength, vigour, might- all-in न. लिं. प्र. वि. ए. व., अहम्- I- प्र. वि. ए. व. of अस्मद्- I, we, शीलमूला- one who is principally based on the character- स्त्री. लिं. प्र. वि. ए. व.- शील- character, good behaviour- मूल- base, foundation, origin- शीलम् मूलम् यस्याः सा- शीलमूला- बहुव्रीहि स., अस्ति- वर्त. प्र. पु. ए. व. of अस्- २ ग. प. प. to be, to exist, तथा- likewise, and, similar to, सदा- all the time, daily, always, अत्र- here, in this place, न- no, not, च- and, एव- just, mere, only अपि- even, also- all अव्ययs

दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम्।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः॥११३॥ - भर्तृहरिनीतिशतकम् २२

ये पुरुषाः एवम् कलासु कुशलाः (सन्ति), तेषु एव च लोकस्थितिः (भवति) - स्वजने दाक्षिण्यम्, परिजने दया, दुर्जने सदा शाठ्यम्, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवम्, शत्रुजने शौर्यम्, गुरुजने क्षमा, कान्ताजने धृष्टता, (इति) ॥

The existence of this world indeed depends upon those people who are generous towards own people, compassionate towards others, always severe towards the wicked, affectionate towards the noble, statesmen towards the ruling, respectful towards the learned, brave against enemies, patient towards the elderly and tactful with loved ones.

स्वजने, परिजने, दुर्जने, साधुजने, नृपजने, विद्वज्जने, शत्रुजने, गुरुजने & कान्ताजने- all in पु. लिं. स. वि. ए. व. of स्वजन- own people, relatives- (स्व-own, self- स्वस्य जनः), परिजन- servants, followers- (परि- अव्यय- prefix to noun means, roundabout, surrounded by), दुर्जन- wicked people- (दुष्टः जनः- समा. प्रादितत्पुरुष स.), साधुजन- noble people-,नृपजन- royal people, rulers- (नृन् पाति इति- नृपः- उपपद तत्पुरुष) विद्वज्जन- scholar, learned, शत्रुजन- enemy गुरुजन- teachers, elders, कान्ताजन- women, ladies- (कान्त- adjctv- desired, loved- क. भू. धा. वि. of कम्- कामयते-१० ग. आ. प. to love- कान्ता- beloved woman- (साधुः जनः, कान्तः जनः, नृपः जनः, विद्वान् जनः, गुरुः जनः, शत्रुः जनः - all विशेषणपूर्वपदकर्मधारय स.), दाक्षिण्यम्- courtesy, politeness, शाठ्यम्- dishonesty, trickery, आर्जवम्- honesty, sincerity, शौर्यम्- bravery, valour, heroism- all in न. लिं. प्र. वि. ए. व., दया- compassion, kindness, mercy, प्रीतिः- love, affection, क्षमा- forbearance, forgiveness, धृष्टता- tactfulness, courage- (धृष्ट- क. भू. धा. वि. of धृष्- धृष्णोति ५ ग. प. प. to be courageous, confident) & लोकस्थितिः- existence of the world- लोकः/लोकम्- world, स्थितिः- existence- लोकस्य स्थितिः- लोकस्थितिः- ष. तत्पुरुष

स.- all in स्त्री. लिं. प्र. वि. ए. व., नयः- statesmanship, wisdom- in पु. लिं. प्र. वि. ए. व., पुरुषाः, कुशलाः & ये- all in पु. लिं. प्र. वि. ब. व. of पुरुष-man, person, कुशल- expert, well versed & यद्-who, कलासु- in स्त्री. लिं. स. वि. ब. व. of कला- art, technique, तेषु- पु. लिं. स. वि. ब. व. of तद्-he, सदा- always, daily, च- and, एवम्- thus, in this manner, एव- just, mere, only- all अव्ययs

वाक्यं तु यो नाद्रियतेऽनुशिष्टः; प्रत्याह यश्चापि नियुज्यमानः।
प्रज्ञाभिमानी प्रतिकूलवादी त्याज्यः स तादृक्त्वरयैव भृत्यः ॥११४॥ -महाभा उद्योगपर्व ५.३७.२४

यः भृत्यः प्रत्याह (कार्येषु) अनुशिष्टः, नियुज्यमानः, वाक्यम् तु न आद्रियते, अपि च यः प्रज्ञाभिमानी, प्रतिकूलवादी (च भवति), तादृक् सः (भृत्यः), त्वरया एव त्याज्यः (भवति) ॥

A servant, who is instructed every day and entrusted, does not honour those instructions but is arrogant of his own wisdom and speaks against those insructions, should be dismissed immediately.

यः (यद्)- who, सः (तद्)- he, भृत्यः- servant, dependent- (भृत्य- (also भरणीय, भर्तव्य & भार्य)- क. वि. धा. सा. वि. of भृ- बिभर्ति- बिभृते ३ ग. उ. प. to support, bear, maintain), अनुशिष्टः- instructed, ordered- अनुशिष्ट- क. भू. धा. वि. of अनु+ शास्- to instruct, order, advise- (शास्- शास्ति २ ग. प. प. to rule, teach, instruct), नियुज्यमानः- being appointed, entrusted, deputed- नियुज्यमान (नियुञ्जान)- वर्त. का. वा. धा. सा. वि. of नि+ युज्- to appoint, depute- (युज्- युनक्ति- युंक्ते ७ ग. उ. प. to join, connect), प्रज्ञाभिमानी- arrogant about one's own wisdom- प्रज्ञा- wisdom, intelligence, अभिमानिन्- proud, arrogant- प्रज्ञायाः अभिमानिन्- प्रज्ञाभिमानिन्- ष. तत्पुरुष स., प्रतिकूलवादी- adversely talking, प्रतिकूलम्- अव्यय- adversely, contrarily, inversely- वादी (वादिन्)- talking, speaking- प्रतिकूलम् वदति इति - प्रतिकूलवादिन्- उपपद तत्पुरुष स., त्याज्यः- to be avoided, given up- त्याज्य- (also त्यजनीय & त्यक्तव्यम्)- क. वि. धा. सा. वि. of त्यज्- त्यजति १ ग. प. प. to leave, abandon & तादृक्- (तादृश्)- adjctv- such-like, like that- all in पु. लिं. प्र. वि. ए. व., प्रत्याह- every day- अहन्- न. लिं.- a day- अहनि अहनि- प्रत्याह- अव्ययीभाव स., वाक्यम्- न. लिं. द्वि. वि. ए. व. of वाक्य- sentence, spoken thing, आद्रियते- वर्त. प्र.. पु. ए. व. of आ+ दृ- to respect, honour- (दृ- द्रियते ६ ग. आ. प. to care, mind), त्वरया- स्त्री. लिं. तृ. वि. ए. व. of त्वरा- hurry, haste, तु- but, on the other hand, न- no, not, अपि- even, also, and, च-and, एव- mere just, only- all अव्ययs

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना ॥११५॥ - भर्तृहरिनीतिशतकम् २५

विष्टपकष्टहारिणि हरौ तुष्टे, देहिना, सच्चरितः सूनुः, प्रियतमा सती, प्रसादोन्मुखः स्वामी, स्निग्धम् मित्रम्, अवञ्चकः परिजनः, निःक्लेशलेशम् मनः, रुचिरः आकारः, स्थिरः विभवः च विद्यावदातम् मुखं, सम्प्राप्यते ।

When the remover of the world's hardships, Lord Vishnu, is pleased, living beings are blessed with well behaved children, a loving wife with good character, an employer eager to help, an affectionate friend, honest servants, a calm stress-free mind, a beautiful figure, steady wealth and a face radiating with scholarship.

विष्टपकष्टहारिणि, हरौ & तुष्टे- all in पु. लिं. स. वि. ए. व. of विष्टपकष्टहारिन्- remover of the world's hardships- विष्टप- world, कष्ट- trouble, evil, bad, हारिन्- carrying, taking, seizing- विष्टपस्य कष्टम्- विष्टपकष्टम्- ष. तत्पुरुष स. & विष्टपकष्टम् हरति इति- विष्टपकष्टहारिन्- उपपद तत्पुरुष स., हरिः- Lord Vishnu & तुष्टः- pleased, satisfied, delighted- तुष्ट- क. भू. धा. वि. of तुष्- तुष्यति ४ ग. प. प. to be pleased, contented, देहिना- पु. लिं. तृ. वि. ए. व. of देहिन्- living being, a man, सूनुः- son, child, सच्चरितः- of good character- सत्- good, noble, चरित- behaviour- क. भू. धा. वि. of चर्- चरति १ ग. प. प. to walk, behave, स्वामी (स्वामिन्)- master, owner, प्रसादोन्मुखः- favourable nature, eager to help- प्रसाद- kindness, favour, उन्मुखः- adjctv- inclined, eager, waiting- प्रसादाय उन्मुखः- प्रसादोन्मुखः- चतुर्थी तत्पुरुष स., परिजनः- servants, followers- (परि- अव्यय- prefix to noun means, round about, surrounded by), अवञ्चकः- honest, trustworthy- वञ्चकः- a cheat, fraudulent- न वञ्चकः- अवञ्चकः- नञ् तत्पुरुष स., आकारः- form, figure, shape, रुचिरः- pleasing, beautiful, स्थिरः- steady, stable, विभवः- wealth, prosperity- all in पु. लिं. प्र. वि. ए. व., प्रियतमा- beloved, wife, & सती- virtuous, lady of good character- both in स्त्री. लिं. प्र. वि. ए. व., मित्रम्- friend, स्निग्धम्- affectionate, tender, मनः (मनस्)- mind, heard, निःक्लेशलेशम्- without a bit of anguish- निस्- अव्यय- devoid of, without, क्लेश- agony, anguish, worldly occupation, लेशम्- very small quality, bit- क्लेशम् लेशम् - विशेषण उत्तरपद कर्मधारय स. & निर्गतम् क्लेशलेशम् - निःक्लेशलेशम्- विशेषण पूर्वपद कर्मधारय स., विद्यावदातम्- radiating with scholarship- विद्या- knowledge, scholarship, अवदातम्- polished, shining, meritorious- विद्यया अवदातम्- विद्यावदातम्- तृ. तत्पुरुष स., मुखम्-face, सम्प्राप्यते- कर्मणी प्रयोग सं+प्र+आप्- सम्प्राप्नोति- वर्त. प्र. पु. ए. व -gets, gets bestowed upon, च- and.

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतो विभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥११६॥ - भर्तृहरिनीतिशतकम् २६

एषः सामान्यः अनुपहतविधिः पन्थाः सर्वशास्त्रेषु श्रेयसाम् (अस्ति) ॥

प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यम्, शक्त्या काले प्रदानम्, परेषाम् युवति-जन- कथा-मूकभावः, तृष्णास्रोतः विभङ्गः, गुरुषु विनयः, सर्वभूतानुकम्पा च ॥

Following is the proper way for successful life, well prescribed in the scriptures.

"Avoiding killing of living beings, control from stealing wealth of others, truthfulness in speech, offering whatever help to others in time of need, keeping silence about stories other's women, stoppage of torrent of greed within, politeness towards elders (teachers) and compassion towards all living beings."

प्राणाघातात्- पु. लिं. पं. वि. ए. व. of प्राणाघातः- killing of life - प्राणः- life, breath of life, आघातः- striking, killing- प्राणस्य आघातः- प्राणाघातः- ष. तत्पुरुष स., निवृत्तिः- aversion, absenteeism, desisting from & सर्वभूतानुकम्पा- compassion towards all living beings a सर्व- all, entire, भूत- living being, अनुकम्पा- compassion, pity- सर्वाणि भूतानि - सर्वभूतानि- विशेषणपूर्वपदकर्मधारय स. & सर्वभूतेभ्य: अनुकम्पा- सर्वभूतानुकम्पा- च. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., परधनहरणे- न. लिं. स. वि. ए. व. of परधनहरणम्- stealing of wealth of others- पर- other, धन- wealth, money, हरणम्- seizing, stealing- परस्य धनम्- परधनम् & परधनस्य हरणम्- परधनहरणम्- both ष. तत्पुरुष स., युवतिजनकथामूकभावः- Silence from stories about women- युवति- young lady, जन- folk, people, कथा- story, talk, मूक- silence- भावः- attitude- युवतिः जनः- युवतिजनः- कर्मधारय स., युवतिजनस्य कथा- युवतिजनकथा- ष. तत्पुरुष स., मूकः भावः- मूकभावः- कर्मधारय स., युवतिजनकथाभ्य: मूकभावः- युवतिजनकथामूकभावः- पञ्चमी तत्पुरुष स., संयमः- control, restraint, विभङ्गः- breaking, stoppage, विनयः- discipline, decorum polite conduct, अनुपहतविधिः- well prescribed practice- सामान्यः- common, general- अनुपहत- adjctv- not injured, unbleached, well prescribed- न उपहत- अनुपहत- नञ् तत्पुरुष स.- उपहत- affected, injured- क. भू. धा. वि. of उप+ हन्- (हन्- हन्ति- २ ग. प. प. to kill), विधिः- rule, practice- अनुपहतः विधिः- अनुपहतविधिः- विशेषणपूर्वपदकर्मधारय स., पन्थाः- (पथिन्)- way, road & एषः (एतद्)- this, he- all in पु. लिं. प्र. वि. ए. व., सत्यवाक्यम्- truthfulness in talk- सत्य- adjctv- true, honest, genuine, वाक्यम्- sentence, speech - सत्यम् वाक्यम्- सत्यवाक्यम्- विशेषणपूर्वपद- कर्मधारय स., तृष्णास्रोतः- flow of greediness, a torrent of greed- तृष्णा- स्त्री. लिं.- greed, thirst, स्रोतः (स्रोतस्)- stream, torrent- तृष्णायाः स्रोतः- तृष्णास्रोतः- ष. तत्पुरुष स. & प्रदानम्- giving, offering- all in न. लिं. प्र. वि. ए. व., शक्त्या- स्त्री. लिं. तृ. वि. ए. व. of शक्तिः- capacity, strength, काले- पु. लिं. स. वि. ए. व. of कालः- time, परेषाम् & श्रेयसाम्- both in पु. लिं. ष. वि. ब. व. of पर- other & श्रेयस्- righteous deed, religious merit, गुरुषु- in पु. लिं. स. वि. ब. व. of गुरुः- elder, teacher, father, सर्वशास्त्रेषु- in न. लिं. स. वि. ब. व. of सर्वशास्त्रम्- all scriptures, treatises- सर्व- all, entire, शास्त्रम्- scriptures, treatises- सर्वम् शास्त्रम्- सर्वशास्त्रम्- विशेषणपूर्वपदकर्मधारय स., च-and- अव्यय

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥११७॥ -भर्तृहरिनीतिशतकम् ३७

यद् इनकान्तः, अचेतनः अपि, सवितुः पादैः स्पृष्टः, प्रज्वलति । तद् तेजस्वी पुरुषः परकृतनिकृतिम् कथम् सहते?

When, even a lifeless Sunstone, fires up (with anger), if touched by the feet (rays) of the Sun. Then, how can a brilliant, living person tolerate dishonesty done by others?

इनकान्तः- sunstone, sun crystal- इनः (सूर्यः)- the Sun, कान्तः- beloved, husband, favourite- कान्त- क. भू. धा. वि. of कम्- कामयते १० ग. आ. प. to love, be enamoured of- इनस्य कान्तः- इनकान्तः (सूर्यकान्तः)- ष. तत्पुरुष स., स्पृष्टः- touched, - क. भू. धा. वि. of स्पृश्- स्पृशति- ६ ग. प. प. to touch, lay the hand on, तेजस्वी (तेजस्विन्)- adjctv- brilliant, illustrious, dignified, पुरुषः- man, person & अचेतनः- lifeless, inanimate- चेतन- adjctv- alive, living, lively- न चेतनः- अचेतनः- नञ् तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., यद्- which, when & तद्- that, it- both in न. लिं. प्र. वि. ए. व., सवितुः- in पु. लिं. ष. वि. ए. व. of सवितृ- Sun, पादैः- in पु/न. लिं. तृ. वि. ब. व. of पाद- foot, a ray of light, परकृतनिकृतिम्- in स्त्री. लिं. द्वि. वि. ए. व. of परकृतनिकृतिः- deception done by the others, पर- other, कृत-done, made- क. भू. धा. वि. of कृ-

करोति-कुरुते ८ ग. उ. प. to do, निकृतिः- wickedness, fraud, dishonesty, deception- परेण कृतम्- परकृतम्- तृ. तत्पुरुष स. & परकृता निकृतिः- परकृतनिकृतिः- विशेषणपूर्वपदकर्मधारय स., प्रज्वलति & सहते- both वर्त. प्र . पु. ए. व. of प्र+ ज्वल्- burn brightly, get ignited- (ज्वल्- ज्वलति- १ ग. प. प. to burn) & सह्- १ ग. आ. प. to tolerate, bear, endure, अपि,-even, also, कथम्- how, in what manner- both अव्ययs

भेदे गणा विनश्युर्हि भिन्नास्तु सुजयाः परैः।
तस्मात्संघातयोगेन प्रयतेरन्गणाः सदा ॥११८॥ - महाभा- शान्तिपर्व १२. १०७.१४

गणाः भेदे विनश्युः हि । परैः भिन्नाः (गणाः) तु सुजयाः (भुयन्ते)। तस्मात् गणाः सङ्घातयोगेन सदा प्रयतेरन्॥

A group of people, when divided, will surely perish. Divided groups are easily conquered by others. Therefore, the groups should always strive to stay together cooperatively (with unity).

भेदे- पु. लिं. स. वि. ए. व. of भेदः- splitting, breaking, interruption, difference- गणाः, भिन्नाः & सुजयाः- all in पु. लिं. प्र. वि. ब. व. of गण- group, union, a collection of units, भिन्न- broken, separated, split, torn- क. भू. धा. वि. of भिद्- भिनत्ति- भिंत्ते ७ ग. उ. प. to break, split, cleave & सुजय- easily winnable, effortlessly conquered- सुखेन जीयते इति- सुजयः- प्रादि उपपद तत्पुरुष स., विनश्युः & प्रयतेरन्- both in विध्यर्थ प्र. पु. ब. व. of वि+ नश्- to get destroyed, perished- (नश्- नश्यति ४ ग. प. प.) & प्र+ यत्- to strive, endeavour- (यत्- यतते १ ग. आ. प. to attempt, try), परैः-in पु. लिं. तृ. वि. ब. व. of परः- other, तस्मात्- therefore- पं. वि. ए. व. तद्- that, it, सङ्घातयोगेन- तृ. वि. ए. व. सङ्घातयोग- collective manner, cooperative means- सङ्घात- assemblage, unity, collection & योग- manner, course, means, mode- सङ्घातस्य योगः- सङ्घातयोगः- ष. तत्पुरुष स., सदा- always, daily, regularly, हि- indeed, surely & तु- but, on the other hand- all अव्ययs

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालनाद्
विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रयान्-
मैत्री चाप्रणयात् समृद्धिरनयात् त्यागप्रमादाद्धनम् ॥११९॥ - भर्तृहरिनीतिशतकम् ४२

दौर्मन्त्र्यात् नृपतिः, सङ्गात् यतिः, लालनाद् सुतः, अनध्ययनात् विप्रः, कुतनयात् कुलम्, खलोपासनात् शीलम्, मद्यात् ह्रीः, अनवेक्षणात् कृषिः, प्रवासाश्रयात् स्नेहः अपि, अप्रणयात् मैत्री, अनयात् समृद्धिः, त्यागप्रमादात् धनम् च विनश्यति॥

A King with bad advice, a sage with (bad) company, a pampered child,, a learned man without ongoing study, a family with a bad son, one's character influenced by wicked people, self-respect under influence of liquor, agriculture without proper tending, love during travel, friendship without affection, prosperity without management and donating wealth carelessly are (eventually) destroyed.

नृपतिः- king,- नृ- man, पतिः- lord, master, husband- नराणाम् पतिः- ष. तत्पुरुष स., यतिः- monk, ascetic, सुतः- child, son, विप्रः- a wise-man, learned man, person belonging to priestly class & स्नेहः- affection, love- all in पु. लिं. प्र. वि. ए. व., कुलम्- family, race, शीलम्- character, behaviour, धनम्- wealth, money- all in न. लिं. प्र. वि. ए. व., ह्रीः- shame, dignity, कृषिः- agriculture, husbandry, मैत्री- friendship, amicability & समृद्धिः- prosperity, wealth, abundance- all in स्त्री. लिं. प्र. वि. ए. व.; दौर्मन्त्र्यात्, सङ्गात्, लालनाद्, अनध्ययनात्, कुतनयात्, खलोपासनात्, मद्यात्, अनवेक्षणात्, प्रवासाश्रयात्, अप्रणयात्, अनयात् & त्यागप्रमादात्- all in पं. वि. ए. व. of दौर्मन्त्र्यम्- न. लिं- evil advice, bad council, सङ्गः- पु. लिं- company with, contact, coming together, लालनम्- न. लिं.- over-indulging, fondling too much, pampering, अनध्ययनम्- न. लिं.- non- study- अध्ययनम्- learning, study, न अध्ययनम्- अनध्ययनम्- नञ् तत्पुरुष स., कुतनयः- पु. लिं.- a bad son- तनयः- son or male descendant- कुत्सितः तनयः- कुतनयः- प्रादि कर्मधारय स., खलोपासनम्- न. लिं.- engaging in bad company- खलः- wicked person, उपासनम् (उपासना)- waiting upon, service, worship- खलस्य उपासनम्- खलोपासनम्- ष. तत्पुरुष स., मद्यम्- न. लिं.- wine, spirituous liquor, अनवेक्षणम्- न. लिं.-not attending to, not caring- अवेक्षणम्- taking care of, attending to- न अवेक्षणम्- अनवेक्षणम्- नञ् तत्पुरुष स., प्रवासाश्रयः- पु. लिं.- staying away while on travel- प्रवासः- travel, journey, आश्रयः- stay, resting place- प्रवासे आश्रयः- प्रवासाश्रयः- स. तत्पुरुष स., अप्रणयः- पु. लिं.- absence of love- प्रणयः- love, affection, न प्रणयः- अप्रणयः- नञ् तत्पुरुष स., अनयः- पु. लिं.- non-management- नयः- policy, statesmanship- न नयः- अनयः- नञ् तत्पुरुष स. & त्यागप्रमादः- पु. लिं.- त्यागः- giving up, leaving, प्रमादः- carelessness, negligence- त्यागे प्रमादः- सप्तमी तत्पुरुष स., विनश्यति- वर्त. तृ. पु. ए. व. of वि+ नश्- to get destroyed, perished- (नश्- नश्यति ४ ग. प. प. to get lost, perish), अपि- even, also, च-and- both अव्ययs

मणिः शाणोल्लीढः समरविजयी हेतिनिहतो मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ॥१२०॥

-भर्तृहरिनीतिशतकम् ४४, पाभे: हेतिनिहतो- हेतिदलितो & नृपाः- नराः

मणिः शाणोल्लीढः, समरविजयी हेतिनिहतः (हेतिदलितः), नागः मदक्षीणः, सरितः शरदि श्यानपुलिनाः, चन्द्रः कलाशेषः, बालवनिता सुरतमृदिता (तथा) नृपाः (नराः) अर्थिषु गलितविभवाः तनिम्ना शोभन्ते।

A jewel polished on a touch stone, a winning warrior injured by weapons, a tired elephant by being in rut, an autumn river shrunk with sand bank, a shrinking moon, young woman tired after making love, kings (men) with lost wealth after giving it to seekers, appear spendid in their weakness.

मणिः- a jewel, , gem, शाणोल्लीढः- polished on the polishing machine- शाणम्- a touchstone, polishing machine उल्लीढः- polished, rubbed- क. भू. धा. वि. of उद्+ लिह्- to polish- (लिह्- लेढि-लीढे २ ग. उ. प. to lick, to chew)- शाणेन उल्लीढः- शाणोल्लीढः- तृ. तत्पुरुष स., समरविजयी (समरविजयिन्)- hero of the war- समरः- battle, war, विजयिन्- winner- समरे विजयते इति- समरविजयिन्- उपपद तत्पुरुष स., हेतिनिहतः- injured by weapons- हेति- पु/स्त्री. लिं- a weapon, missile, निहतः- laid, lodged- हेतिना निहतः- तृ. तत्पुरुष स. & दलितः- torn, injured- both क. भू. धा. वि. of नि+ हन्- to strike- (हन्- हन्ति २ ग. प. प. to kill) & दल्- दलति १ ग. प. प. to split, crack, नागः- an elephant, मदक्षीणः- weak by being in rut- मद-

rut, ichor, क्षीणः- weak, lean- क. भू. धा. वि. of क्षि-१, ५ & ९ प. प. क्षयति, क्षिणोति & क्षिणाति- to effect, diminish- मदेन क्षीणः- तृ. तत्पुरुष स., चन्द्रः- the moon, कलाशेषः- small, कला- a small part of anything, शेषः- remainder, part, कलया शेषः- तृ. तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., सरितः & श्यानपुलिनाः - both in स्त्री. लिं. प्र. वि. ब. व. of सरित्- river & श्यानपुलिना- श्यान- coagulated, shrunk- क. भू. धा. वि. of श्यै- श्यायते १ ग. आ. प. to be coagulated, shrunk, पुलिन- पु/न. लिं- a sand bank, beach- पुलिनेन श्याना - श्यानपुलिना- - तृ. तत्पुरुष स., बालवनिता- young woman, बाल- young, वनिता- woman- बाला वनिता- वि. पू. प. कर्मधारय स. & सुरतमृदिता- tired after making love- सुरत- सु- अव्यय- good, रत- delighted, sexual union- क. भू. धा. वि. of रम्- रमते १ आ. प. to rejoice, मृदित- bruised, squeezed- क. भू. धा. वि. of मृद्- मृद्नाति ९ प. प.- सुरतेन मृदिता- तृ. तत्पुरुष स.- both in स्त्री. लिं. प्र. वि. ए. व., नृपाः, नराः & गलितविभवाः- all in पु. लिं. प्र. वि. ब. व. of नृप- King- नृ- a man- नॄन् पाति इति- नृपः- उपपद तत्पुरुष स., नर- a man person & गलितविभवः- गलित- lost, deprived, filtered- क. भू. धा. वि. of गल्- गलति १ ग. प. प. to drop, fall down, disappear, विभवः- wealth, greatness, prosperity- गलितः विभवः- गलितविभवः- विशेषणपूर्वपदकर्मधारय स., शरदि- स्त्री. लिं. स. वि. ए. व. of शरद्- autumn, अर्थिषु- in पु. लिं. स. वि. ब. व. of अर्थिन्- seeker, one who asks, begs, तनिम्ना- in पु. लिं. तृ. वि. ए. व. of तनिमन्- slenderness, shallow, thin, weak शोभन्ते- वर्त. तृ. पु. ब. व. of शुभ्- शोभते १ ग. आ. प. to to be splendid, look beautiful, shine.

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये स पश्चात्सम्पूर्णः कलयति धरित्रीं तृणसमाम् ।
अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिनामवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥१२१॥

-भर्तृहरिनीतिशतकम् ४५

कश्चित् परिक्षीणः यवानाम् प्रसृतये स्पृहयति। पश्चात् सः (यदा) सम्पूर्णः (भवति तदा) धरित्रीम् तृणसमाम् कलयति। अतः च अर्थेषु गुरुलघुतया अनैकान्त्याद्, धनिनाम् वस्तूनि अवस्था प्रथयति च सङ्कोचयति च॥

An impoverished person humbly longs for handful barley. After becoming a prosperous man later, he considers earth equivalent to a straw. Thus, due to unsteady nature of the wealth, rich people's condition of their materialistic world grows or shrinks.

कश्चित् (कः चित्)- someone, परिक्षीणः- impoverished, emaciated- क. भू. धा. वि. of परि+ क्षि- (क्षि- क्षयति १ ग प. प. to decay, ruin, diminish), सः (तद्)- he, सम्पूर्णः- full, accomplished, prosperous- क. भू. धा. वि. of सं+ पूर्- (पूर्- पूर्यते ४ ग. आ. प. to fill)- all in- पु. लिं. प्र. वि. ए. व., यवानाम्- in- पु. लिं. ष. वि. ब. व. of यवः- barley, प्रसृतये- पु. लिं. स. वि. ए. व. of प्रसृतः-palm of hand stretched out, modest, humble- प्रसृत- क. भू. धा. वि. of प्र+सृ- to spread, prevail- (सृ- सरति, सिसर्ति १, ३ ग. प. प. to go, move, स्पृहयति, कलयति, प्रथयति & सङ्कोचयति- all in वर्त. प्र. पु. ए. व. of स्पृह्- १० ग. उ. प. to desire for, long for, कल्- count, hold, consider, प्रथ्- १० ग. उ. प. to extend, increase, spread, proclaim & सं+कुच्- (प्रयोजक)- to shrink, diminish, contract- (कुच्- कुचति ६ ग. प. प. to contract, to go, to utter), धरित्रीम् & तृणसमाम्- both स्त्री. लिं. द्वि. वि. ए. व. of धरित्री- earth, land & तृणसमा- like a straw- तृणम्- grass, straw, सम- adjctv- like, similar to- तृणस्य समा या सा- तृणसमा- बहुव्रीहि स., अनैकान्त्यात् = अनिश्चतत्वेन- due to uncertain nature, unsteady condition- न. लिं. पं. वि. ए. व. of अनैकान्त्यम्- unsteady, uncertain, एकान्त- solitary, absolute, invariable- एकान्तस्य भाव- ऐकान्त्यम्- absoluteness, invariability- न ऐकान्त्यम्- अनैकान्त्यम्- नञ् तत्पुरुष स., अर्थेषु- पु. लिं. स. वि. ब. व. of अर्थः- wealth, money, property, गुरुलघुतया- स्त्री. लिं. तृ. वि.

ए. व. of गुरुलघुता- big and small size- गुरु- big, huge, लघु- small, minute- गुरुः च लघुः च- गुरुलघुः- ता- suffix implies quality, धनिनाम्- in- पु. लिं. ष. वि. ब. व. of धनिन्- a wealthy person, rich-man, अवस्था- state, condition, वस्तूनि- न. लिं. द्वि. वि. ब. व. of वस्तु- item, matter, article, च- and, पश्चात्- after, subsequently, then, अतः (अतस्)- therefore, from this, than- all अव्ययs

यथा वायुस्तृणाग्राणि संवर्तयति सर्वशः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥१२२॥ - महाभा- स्त्रीपर्व ११.२.९

भरतर्षभ, यथा वायुः तृणाग्राणि सर्वशः संवर्तयति, तथा भूतानि कालवशम् यान्ति॥

(Council of Vidhura to Dhrutarastra after conclusion of the war)

Oh, great King, just like wind blows away pieces of straw everywhere, all living beings undergo influence of time.

भरतर्षभ- Oh great King- भरत- ancestor king of Kauravas and Pandavas- ऋषभ- the foremost, best- भरतस्य कुलेषु ऋषभः यः सः- भरतर्षभः- बहुव्रीहि स.- पु. लिं. सं. वि. ए. व., वायुः- wind, Wind-God पु. लिं. प्र. वि. ए. व., तृणाग्राणि- न. लिं. द्वि. वि. ब. व. of तृणाग्रम्- piece of hay, straw- तृणम्- straw, grass, अग्रम्- adjctv- tip, top portion- तृणस्य अग्रम्- तृणाग्रम्- ष. तत्पुरुष स., संवर्तयति- वर्त. प्रयोजक प्र. पु. ए. व. of सं+ वृत्- cause to spread, भूतानि- न. लिं. प्र. वि. ब. व. of भूतम्- a being, living being, creature, कालवशम्- under the influence of time, destiny- न. लिं. द्वि. वि. ए. व.- कालः- time, period, fate, destiny, वशम्- influence, power, control- कालस्य वशम्- कालवशम्- ष. तत्पुरुष स., यान्ति- वर्त. प्र. पु. ब. व. of या- याति २ ग. प. प. to go, to come to, to undergo, become, यथा- in which way manner, तथा- like that, in that manner, सर्वशः (सर्वशस्)- everywhere, on all sides, entirely, wholly- all अव्ययs

राजन् दुधुक्षसि यदि क्षितिधेनुमेतां तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे नानाफलैः फलति कल्पलतेव भूमिः॥१२३॥ -भर्तृहरिनीतिशतकम्- ४६

राजन्, यदि एताम् क्षितिधेनुम् दुधुक्षसि, तेन अद्य वत्सम् इव लोकम् अमुम् पुषाण। तस्मिन् सम्यग् अनिशम् परिपोष्यमाणे, (सा) भूमिः कल्पलता इव च नानाफलैः फलति॥

Oh King, if you wish to milk this land like a cow, then nurture its subjects like a calf today. If constantly well taken care of, this land will yield multitudes of results like a wish-granting creeper.

राजन्- King पु. लिं. सं. वि. ए. व., एताम् & क्षितिधेनुम्- स्त्री. लिं. द्वि. वि. ए. व. of एतद्- this & क्षितिधेनु- Earth in the form of a cow- क्षितिः- earth, land, धेनु- cow- क्षितिः धेनुः इव- उपमानोत्तरपदकर्मधारय स., दुधुक्षसि- प्रयोजक वर्त. द्वि. पु. ए. व. of दुह्- दोहयति- desiderative- दुधुक्षति- (दुह्- दोग्धि- दुग्धे २ ग. उ. प. to milk, to extract), तेन- पु/न. लिं. तृ. वि. ए. व. of तद्- he, it, that, वत्सम्, लोकम् & अमुम्- पु. लिं. द्वि. वि. ए. व. of वत्सः-

calf, young one of an animal, boy, son, लोकः- people, subject & अदस्- that, he, पुषाण- आज्ञार्थ द्वि. पु. ए. व. of- पुष्- पुष्णाति ९ ग. प. प. to nurture, bring up, develop, तस्मिन् & परिपोष्यमाणे- पु/न. लिं. स. वि. ए. व. of तद्- he, it, that & परिपोष्यमाण- being well taken care of- कर्तरि वर्त. का. वा. धा. सा. वि. of परि+ पुष्- to well take care of- (पुष्- पोषयति- १० उभय), कल्पलता- wish granting creeper- स्त्री. लिं. द्वि. वि. ए. व.- लता- creeper- कल्पितम् ददाति या लता सा- कल्पलता- बहुव्रीहि स. & भूमिः- earth, land- both in स्त्री. लिं. प्र. वि. ए. व., नानाफलैः- न. लिं. तृ. वि. ब. व. of नानाफलम्- varieties of fruit, multiple benefits- नाना- अव्यय- varieties of, many, multiple- फलम्- fruit, result- फलम् नानाकृत्य- नानाफलम्- अव्ययीभाव स., फलति- वर्त. तृ. पु. ए. व. of फल्- to bear fruit, yield, यदि- if, in case, च- and, इव- like, similar to, अद्य- today, now, सम्यक्- properly, well, correctly, अनिशम्- ceaselessly, constantly- all अव्ययs

आज्ञा कीर्तिः पालनं ब्राह्मणानां , दानं भोगो मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः, कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥१२४॥ -भर्तृहरिनीतिशतकम् -४८

पार्थिव, आज्ञा, कीर्तिः, ब्राह्मणानाम् पालनम्, दानम्, भोगः, मित्रसंरक्षणम् च एते षड्गुणाः येषाम् (पार्थिवानाम्) न प्रवृत्ताः (सन्ति), तेषाम् उपाश्रयेण कः अर्थः (स्यात्) ?

Oh King, If the following six virtues, - proper command, creating reputation, looking after the priestly class, generosity in giving, good governance and protection of friends- are absent in (rulers), what is the purpose of depending on them ?

पार्थिव- Oh King- पु. लिं. सं. वि. ए. व., आज्ञा- order, command & कीर्तिः- fame, glory, renown- both स्त्री. लिं. प्र. वि. ए. व., भोगः- enjoyment, utility,revenue, governing, ब्राह्मणानाम्, येषाम् & तेषाम्- all in- पु. लिं. ष. वि. ब. व. of ब्राह्मणः- a theologian, a person belonging to priestly class or first of the four original casts, यद्- who & तद्- he, पालनम्- protection, maintenance, looking after दानम्- charity, benevolence, मित्रसंरक्षणम्- protection of a friend- मित्रम्- friend, protection- मित्रस्य संरक्षणम्- मित्रसंरक्षणम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., एते, षड्गुणाः, प्रवृत्ताः- all in पु. लिं. प्र. वि. ब. व. of एतद्- this, षड्गुणः- षड्- six, गुणः- quality, virtue- षड् गुणाः- षडानां गुणानां समाहारः - द्विगु समास & प्रवृत्तः- well established, manifested, settled- क. भू. धा. वि. of प्र+ वृत्- (वृत्- वर्तते १ ग. आ. प. to exist, to be, to be available), उपाश्रयेण- पु. लिं. तृ. वि. ए. व. of उपाश्रय- support, reliance, dependence upon, कः- what, अर्थः- purpose, meaning- both in पु. लिं. तृ. वि. ए. व., च- and, न- no, not

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥१२५॥ -भर्तृहरिनीतिशतकम् श्लो.५७

चण्डकोपानाम् भूभुजाम् न कश्चित् आत्मीयः नाम (भवति)। पावकः, स्पृष्टः (सन्), जुह्वानम् होतारम् अपि दहति॥

There is indeed no one close to Kings with violent tempers. A fire burns even the priest if he touches it while conducting the sacrificial rites.

चण्डकोपानाम् & भूभुजाम्- both in पु. लिं. ष. वि. ब. व. of चण्डकोपः- a person of violent temper- चण्ड- adjctv- violent, fierce, hot- कोपः- anger, wrath- चण्डः कोपः यस्य सः- चण्डकोपः- बहुव्रीहि स. & भूभुजः- king, ruler- भूः- land, earth, भुवम् भुनक्ति इति- भूभुजः- उपपद तत्पुरुष स., कश्चित्- (कः चित्)- someone, anyone, न कश्चित्-none, no one, आत्मीयः (आत्मकीयः)- adjctv- one who is close to, one's own, of kin- (आत्मन्- self, one's own), पावकः- fire, स्पृष्टः- touched- क. भू. धा. वि. of स्पृश्- स्पृशति ६ ग. प. प. to touch, lay hand on- all in पु. लिं. प्र. वि. ए. व., जुह्वानम् & होतारम्- both in पु. लिं. द्वि. वि. ए. व. of जुह्वानः- one who is conducting yajnya (putting offerings in fire)- वर्त. का. वा. धा. सा. वि. of हु- जुहोति ३ ग. प. प. to make offerings to a deity by placing it in the sacred fire & होतृ- a priest conducting yajnya, दहति- वर्त. प्र. पु. ए. व. of दह्- १ ग. प. प. to burn, scorch, अपि- even, also, नाम- named, called, indeed, truly, perhaps- both अव्ययs

गुणा दश स्नानशीलं भजन्ते बलं रूपं स्वरवर्णप्रशुद्धिः।
स्पर्शश्च गन्धश्च विशुद्धता च श्रीस्सौकुमार्यं प्रवराश्च नार्यः ॥१२६॥ - महाभा- उद्योगपर्व ५. ३७. ३३

नार्यः (पुरुषस्य एते) दश गुणाः भजन्ते - बलम्, रूपम्, स्वरवर्णप्रशुद्धिः, स्पर्शः च गन्धः च विशुद्धता च श्रीः, सौकुमार्यम्, प्रवराः, स्नानशीलम् च ॥

Women appreciate following ten qualities (in men) - strength (power), good looks, well-modulated voice and fluent language, soft touch, good bodily smell, purity, wealth (prosperity), youthfulness; good behaviours and cleanliness.

बलम्- strength, power), रूपम्- presentable figure, सौकुमार्यम्- youthfulness- all in न. लि. प्र. वि. ए. व., स्वरवर्णप्रशुद्धिः- well modulated voice स्वरः- voice, tone, वर्णः- beauty, class, colour, प्रशुद्धिः- purity- स्वरस्य वर्णः- स्वरवर्णः & स्वरवर्णस्य प्रशुद्धिः- स्वरवर्णप्रशुद्धिः- both in ष. तत्पुरुष स., विशुद्धता- excellent purity, cleanliness- शुद्ध- pure, clean- क. भू. धा. वि. of शुध्- शुध्यति ४ ग. प. प. to become pure, clean- शुद्धता- cleanliness- स्त्री. लिं.- विशेषा शुद्धता- विशुद्धता- प्रादि कर्मधारय स., श्रीः- wealth, prosperity, स्पर्शः- touch, feel & गन्धः-smell, odour- both in पु. लि. प्र. वि. ए. व., प्रवराः, दश & गुणाः- all in पु. लि. प्र. वि. ब. व. of प्रवरः- family, race, behaviour, character, दशन्-ten & गुणः- virtue, quality, valuable, नार्यः- in स्त्री. लि. प्र. वि. ब. व. of नारी- woman, lady, स्नानशीलम्- in पु. लि. प्र. वि. ए. व. - habit of taking bath regularly, cleanliness स्नानम्- bathing, washing, शीलम्- disposition, habit, character, nature- भजन्ते- वर्त. प्र. पु. ब. व. of भज्- भजते, च-and- अव्यय

अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः।
अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्ट गुणोपपन्नम् ॥१२७॥ -महाभा उद्योगपर्व ५. ३७. २५

(यः) अस्तब्धम्, अक्लीबम्, अदीर्घसूत्रम्, सानुक्रोशम्, श्लक्ष्णम्, अन्यैः अहार्यम्, अरोगजातीयम्, उदारवाक्यम् (इति) अष्ट गुणोपपन्नम् (अस्ति), (सः) दूतम् (इति प्राज्ञाः) वदन्ति॥

Wise men consider that person to be an ambassador who is endowed with these eight qualities, namely, flexible, strong, concise in words, compassionate, sophisticated, incorruptible, from a healthy family and an excellent speaker.

अस्तब्धम्- न स्तब्धम्- not stubborn, flexible, अक्लीबम्- न क्लीबम्- not cowardly, strong, अदीर्घसूत्रम्- न दीर्घसूत्रम्- not giving long speeches, concise, quick in action, अहार्यम्- न हार्यम्- incorruptible, not snatchable- (हार्य also हरणीय & हर्तव्य- क. वि. धा. सा. वि. of हृ- हरति- ते १ ग. उ. प. to take away, to influence) & अरोगजातीयम्- न रोगजातीयम्- from a disease free family, from healthy family- (रोग- disease, जातिः- family, race, lineage, जातीयः- belonging to the family, race- रोगस्य जातीयः- रोगजातीयः- ष. तत्पुरुष स.)- all नञ् तत्पुरुष स., सानुक्रोशम्- with compassion, tenderness- अनुक्रोश- compassion- अनुक्रोशेन सह- सानुक्रोश- सहबहुव्रीही स., श्लक्ष्णम्- gentle, polished, उदारवाक्यम्- exalted in the speech- उदार- generous, liberal, exalted, वाक्यम्- speech, talk- वाक्येषु उदारः यः सः- उदारवाक्यः- बहुव्रीहि स., गुणोपपन्नम्- endowed with qualities- गुण- quality, virtue, उपपन्नः- endowed with, inherited- क. भू. धा. वि. of उप+ पद्- to occur, happen- पद्- पद्यते ४ ग. आ. प. to go, approach- गुणेन उपपन्नः- गुणोपपन्नः- तृ. तत्पुरुष स. & दूतम्- ambassador, messenger, envoy- all in पु. लिं. द्वि. वि. ए. व., अष्ट- प्र. वि. ब. व. of अष्टन्- eight, अन्यैः- by others- in पु. लिं. तृ. वि. ब. व. of अन्यः- other, another, वदन्ति- वर्त. प्र. पु. ब. व. of वद्- वदति १ ग. प. प. to tell, declare.

अधिगतपरमार्थान् पण्डितान् मावमंस्थास्तृणमिव लघु लक्ष्मीर्नैव तान्संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां न भवति बिसतन्तुर्वारणं वारणानाम् ॥१२८॥

-भर्तृहरिनीतिशतकम् १७

अधिगत-परम-अर्थान् पण्डितान् मा अवमंस्थाः । लक्ष्मीः तान् लघु तृणम् इव न संरुणद्धि। बिसतन्तुः अभिनव- मद- रेखा-श्याम-गण्डस्थलानाम् वारणानाम् वारणम् न भवति ॥

Do not humiliate learned scholars, who have acquired the knowledge of the supreme. Power of wealth is like a blade of grass, which will not be able to stop them. A rope made of stalks of lotus will not be able to restrain a fully-grown elephant, whose temple is dark with streaks of its ichor

अधिगतपरमार्थान्, पण्डितान् & तान्- all in पु. लिं. द्वि. वि. ब. व. of अधिगतपरमार्थः- one who has acquired the knowledge of the supreme- अधिगत- acquired, obtained- क. भू. धा. वि. of अधि+ गम्- to acquire (गम्- गच्छति १ ग. प. प. to go), परमार्थः- ultimate truth- परम- adjctv- highest, greatest, supreme, अर्थः- meaning, purpose- परमः अर्थः- परमार्थः- वि. पू. प. कर्मधारय स. & अधिगतः परमार्थः येन सः- अधिगतपरमार्थः- बहुव्रीहि स., पण्डितः- learned scholar, expert & तद्- he, अवमंस्थाः- सामान्य (द्वि) भूत मध्यम. पु. ए. व. of अव+ मन्- to disregard, slight despise- (मन्- मन्यते- मनुते ४, ८ ग. आ. प. to belive, think), लक्ष्मीः- wealth, Goddess of wealth- स्त्री. लिं. प्र. वि. ए. व., लघुतृणम्- small blade of grass- लघु- small, little, तृणम्- grass, hay- लघु तृणम्- लघुतृणम्- वि. पू. प. कर्मधारय स. & वारणम्- impediment, obstacle- both in न. लिं. प्र. वि. ए. व., बिसतन्तुः- rope of a lotus-stalks- बिसम्- stalk of a lotus, तन्तुः- fibre, cord- बिसस्य तन्तुः- बिसतन्तुः- ष. तत्पुरुष स., अभिनवमदलेखाश्यामगण्डस्थलानाम् & वारणानाम्- both in पु. लिं. ष. वि. ब. व. of अभिनवमदलेखाश्यामगण्डस्थलः- one whose temple is darkened with streaks of fresh ichor-

अभिनव- fresh, new, मद- ichor, rut, रेखा- line, streak, श्याम- dark, black, गण्डस्थलः- temple of an elephant- (गण्डः- cheek, temple of an elephant, स्थलः- place- गण्डस्य स्थलः- गण्डस्थलः- ष. तत्पुरुष स.)- अभिनवः मदः- अभिनवमदः- वि. पू. प. कर्मधारय स., अभिनवमदस्य रेखा- अभिनवमदरेखा- ष. तत्पुरुष स., अभिनवमदरेखया श्यामः- अभिनवमदरेखाश्यामः- तृ. तत्पुरुष स. & अभिनवमदरेखाश्यामः गण्डस्थलः यस्य सः- अभिनवमदलेखाश्यामगण्डस्थलः- बहुव्रीहि स. & वारणः- an elephant, भवति & संरुणद्धि- both वर्त. प्र. पु. ए. व. of भू- to be, to exist, become & सं+ रुध्- detain, arrest, hold fast- (रुध्- रुणद्धि- to stop, check), मा- particle of prohibition- that not, lest, न- no, not, इव- like, similar to- all अव्ययs

न निह्नवं मन्त्रगतस्य गच्छेत् संसृष्टमन्त्रस्य कुसङ्गतस्य।
न च ब्रूयान्नाश्वसिमि त्वयीति सकारणं व्यपदेशं तु कुर्यात् ॥१२९॥ - महाभा उद्योगपर्व ५. ३७..२९

मन्त्रगतस्य संसृष्टमन्त्रस्य, कुसङ्गतस्य (राज्ञः/ यजमानस्य/स्वामिनः), न निह्नवम् गच्छेत्। त्वयि न आश्वसिमि इति न च ब्रूयात्। (तस्य) सकारणम् व्यपदेशम् तु कुर्यात्।

When a King is surrounded by bad ministers who counsel him, does not openly go against them and does not say that you do not agree with him, you ought to convince him with reasoning of your views.

मन्त्रगतस्य, संसृष्टमन्त्रस्य & कुसङ्गतस्य- all in पु. लिं. ष. ए. व. of मन्त्रगतः- one who is getting counseled- मन्त्र- counsel, advice, deliberation, गतः- gone, undergone- क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, reach- मन्त्रम् गतः यः सः- मन्त्रगतः, संसृष्टमन्त्रः- one who is surrounded by advisors- संसृष्ट- united together, in assembly- क. भू. धा. वि. of सं+ सृज्- to be united, be in contact- (सृज्- सृजति ६ ग. प. प. to create, make), मन्त्र- see above- संसृष्टः मन्त्रः येन सः- संसृष्टमन्त्रः & कुसङ्गतः- one who is assembled with wicked people- कु- अव्यय- a prefix implies bad, wicked, mean, सङ्गतः- together, assembled, convened- सङ्गत- क. भू. धा. वि. of सं+ गम्- to go with, to accompany- कुत्सितस्य सङ्गतः यः सः- कुसङ्गतः- all three बहुव्रीहि स., निह्नवम्, सकारणम् & व्यपदेशम्- all in पु/न. लिं. द्वि. ए. व. of निह्नव- mistrust, doubt, suspicion, सकारण- with reasoning- कारण- reason, cause- कारणेन सह- सकारण- सहबहुव्रीही स., व्यपदेशः- representation, pleading, convincing, गच्छेत्, ब्रूयात् & कुर्यात्- all in विध्यर्थ प. प. प्र. पु. ए. व. of गम्- see above, ब्रू- ब्रवीति- ब्रूते २ ग. उ. प. to say, speak & कृ- करोति- कुरुते ८ ग. उ. प. to do, make, त्वयि-in you- स. वि. ए. व. of युष्मद्- you, आश्वसिमि- वर्त. उ. पु. ए. व. of आ+ श्वस्- to believe, agree- (श्वस्- श्वसिति- २ ग. प. प. to breathe), तु- however, on the other hand, but, न-no, not, इति- a particle used to report very word spoken: thus, in this manner, च-and- all अव्ययs

त्वमेव चातकाधारोऽसीति केषां न गोचरः ।
किमम्भोदवरास्माकं कार्पण्योक्तिं प्रतीक्षसे ॥१३०॥ -भर्तृहरिनीतिशतकम् श्लो.५०

अम्भोदवर, त्वम् एव चातकाधारः असि इति । त्वम् केषाम् न गोचरः (असि)। किम् अस्माकम् कार्पण्योक्तिम् प्रतीक्षसे?

(Said by चातक- a bird that is supposed to live directly on raindrops)

'Oh, the best among the clouds! You alone are the sustainer of the Chataks. You are not anybody else's domain. Why do you keep us waiting by our poor crying?

अम्भोदवर- Oh, the best among the clouds- पु. लिं. सं. वि. ए. व.- अम्भस्- न. लिं.- water, अम्भः ददाति इति- अम्भोदः- उपपद तत्पुरुष स. & अम्भोदस्सु वरः - स.तत्पुरुष, अस्माकम् & केषाम्- both ष. वि. ब. व. of अस्मद्- I, we & कः (किम्)- who, कार्पण्योक्तिम्- स्त्री. लिं. द्वि. वि. ए. व. of कार्पण्योक्तिः- miserable pleading- कार्पण्यम्- न. लिं.- poverty, indigence, pity, उक्तिः- स्त्री. लिं.- expression, speech- कार्पण्ययुक्ता उक्तिः- कार्पण्योक्तिः- लुप्तपद कर्मधारय स, प्रतीक्षसे & असि - वर्त. मध्यम. पु. ए. व. of प्रति+ ईक्ष्- to expect, await- (ईक्ष्- ईक्षते १ आ. प. to see, observe) & अस्- २ ग. प. प. to be, to exist, त्वम्- प्र. वि. ए. व. of युष्मद्- you, चातकाधारः- sustainer or supporter Chataks- चातक- a bird which is supposed to live directly on raindrops, आधारः- sustainer, supporter- चातकस्य आधारः- चातकाधारः- ष. तत्पुरुष स. & गोचरः- field , section, domain (गो- पु/स्त्री. लिं- cattle & चर- adjctv- moving, going- कुत्र गौः चरति तद्- गोचरम्- बहुव्रीहि स.)- both पु. लिं. प्र. वि. ए. व., इति- a particle used to report the very word spoken- thus, in this manner, किम्- a particle of interrogation- is it not?, न- no, not, एव- just, mere, only- all अव्ययs

पिपीलिकार्जितं धान्यं मक्षिकासञ्चितं मधु ।
लुब्धेन सञ्चितं द्रव्यं समूलं हि विनश्यति ॥१३१॥ -- courtesy शारदाप्रकाश-संघ

पिपीलिकार्जितम् धान्यम्, मक्षिकासञ्चितम् मधु, लुब्धेन सञ्चितम् द्रव्यम् च समूलम् विनश्यति॥

Grains collected by the ants, honey collected by the bees and the wealth accumulated by a greedy person are lost completely (stolen by someone) indeed.

पिपीलिकार्जितम्- collected by ants- पिपीलिका- a female ant- (पिपीलिकः- an ant), अर्जितम्- secured, earned, gained- (अर्जित- क. भू. धा. वि. of अर्ज्- अर्जति १ ग. प. प.)- पिपीलिकया अर्जितम्- पिपीलिकार्जितम्- तृ. तत्पुरुष स., धान्यम्- grain, मक्षिकासञ्चितम्- collected by bees, मक्षिका- a bee, सञ्चितम्- hoarded, collected, gathered- सञ्चित- क. भू. धा. वि. of सं+ चि- (चि- चिनोति- चिनुते ५ ग. उ. प. to collect)- मक्षिकया सञ्चितम्- तृ. तत्पुरुष स., मधु- honey, द्रव्यम्- wealth, money, समूलम्- adjctv- having totally removed, along with roots (without leaving anything)- मूलम्- root, मूलेन सह- समूलम्- सहबहुव्रीही स.-all in न. लिं. प्र. वि. ए. व., लुब्धेन- पु. लिं. तृ. वि. ए. व. of लुब्धः-a greedy or covetous person- लुब्ध- क. भू. धा. वि. of लुभ्- लुभ्यति ४ ग. प. प. to covet, desire, long for, विनश्यति- वर्त प्र. पु. ए. व. of -वि + नश्- to get destroyed or lost completely- (नश्- नश्यति ४ ग. प. प. to be lost), च-and-अव्यय

अहंकारो धियं ब्रूते मैनं सुप्तं प्रबोधय ।
उत्थिते परमानन्दे न त्वं नाहं न वै जगत् ॥१३२॥ -महासुभाषित संग्रह श्लो. ४०२८

अहंकारः धियम् ब्रूते । मा एनम् सुप्तम् प्रतिबोधय । परमानन्दे उत्थिते, न त्वम्, न अहम्, न वै जगत् (भविष्यति) ॥

Egotism or self-pride tells the intellect within the person. Do not awaken this sleeping one. Once this supreme consciousness within gets awakened, not you, nor myself, nor indeed this world would exist'. (Once the supreme consciousness of a person gets awakened all other things in the world are immaterial)

अहंकारः- sense of self, pride, egotism- पु. लिं. प्र. वि. ए. व., धियम्- स्त्री. लिं. द्वि. वि. ए. व. of धी- intellect, understanding, thought, त्वम्, अहम्, & जगत्- all in प्र. वि. ए. व. of युष्मद्- you, अस्मद्- I, we & जगत्- न. लिं.- world, ब्रूते- वर्त. प्र. पु. ए. व. of ब्रू- ब्रवीति- ब्रूते- २ ग. उ. प. to say, speak, एनम् & सुप्तम् both in- पु. लिं. द्वि. वि. ए. व. of इदम्- he & सुप्त- sleeping- क. भू. धा. वि. of स्वप्- स्वपिति २ ग. प. प. to sleep, प्रतिबोधय- प्रयोजक आज्ञार्थ द्वि. पु. ए. व. of प्रति + बुध्- प्रतिबोधयति to wake, wake up- (बुध्- बोधति-ते, बुध्यते- १ उ. प. & ४ ग. आ. प. to to know, understand), परमानन्दे & उदिते- पु. लिं. स. वि. ए. व. of परमानन्दः- supreme joy, Aatma, realisation of the self- परम- adjctv- supreme, ultimate, आनन्दः- joy, happiness- परमः आनन्दः- परमानन्दः- वि. पू. प. कर्मधारय स. & उत्थित: - risen, ascended- क. भू. धा. वि. of उद्+ स्था - (स्था -तिष्ठति १. ग. प. प. to go), मा- particle of prohibition- lest, that not, वै- particle of affirmation or certainty- indeed, surely, न no, not- all अव्ययs

संक्लिष्टकर्माणमतिप्रमादं नित्यानृतं चादृढभक्तिकं च।
विसृष्टरागं पटुमानिनं चाप्येतान्न सेवेत नराधमान्षट्॥१३३॥।-महाभा उद्योगपर्व ५. ३७. ३७ (सुधर्मा)

(ए) तान् षट् नराधमान् न सेवेत।

संक्लिष्टकर्माणम्, अतिप्रमादम्, नित्यानृतम् च अदृढभक्तिकम् च विसृष्टरागम्, पटुमानिनम् च अपि ॥

One should not serve following six worst human beings:

A person of unreliable action, a very careless person, a person who always speaks untruth, a person with undependable loyalty, a person devoid of any affection and also one who thinks himself to be all knowledgeable.

संक्लिष्टकर्माणम्, अतिप्रमादम्, नित्यानृतम्, अदृढभक्तिकम्, विसृष्टरागम् & पटुमानिनम्-all in पु. लिं. द्वि. वि. ए. व. of संक्लिष्टकर्मन्- a person of unreliable action- संक्लिष्ट- adjctv- inconsistent, contradictory- क. भू. धा. वि. of सं+ क्लिश्- to contradict, to be inconsistent (क्लिश्- क्लिश्यते ४ ग. आ. प. to be tormented, afflicted), कर्मन्- न. लिं.- work, action, duty- संक्लिष्टं कर्म यस्य सः- संक्लिष्टकर्मा , अतिप्रमादः- excessively careless, negligent- अति- अव्यय- prefix implies: excessive, very much, प्रमाद- carelessness, negligence- य: अतिशयितम् प्रमादं करोति सः, नित्यानृतः- one who always speaks untruth- नित्यम्- अव्यय- every day, always, ऋत- adjctv- truth, honesty- न ऋत- अनृत- dishonesty, untruth- य: नित्यम् अनृतम् वदति स; अदृढभक्तिकः- one who has undependable loyalty- दृढ- adjctv- fixed, firm, न दृढा- अदृढा, भक्तिः- स्त्री. लिं.- devotion, loyalty- यस्य भक्ति: अदृढा अस्ति स: -अदृढभक्तिकः, विसृष्टरागः- one who is devoid of affection- विसृष्ट- shed, let go, discharged- क. भू. धा. वि. of वि+ सृज्- to st free- (सृज्-

सृजति- ६ ग. प. प. to create, make), रागः- affection, love- विसृष्टः रागः यस्य सः- विसृष्टरागः - बहुव्रीही स - पटुमानिन्- one who thinks too much of himself- पटु- expert, knowledgeable, मानिन्- fancying, considering- पटुः इति स्वयम् मनुते यः सः -पटुमानिन्- All बहुव्रीही स., तान्, षट् & नराधमान्- पु. लिं. द्वि. वि. ब. व. of तद्- he, षट् (षड्)- six, & नराधमः- most wicked person- नरः- man, person, अधम- adjctv- the lowest, meanest, very bad- नरेषु अधमः यः सः- नराधमः- बहुव्रीही स., सेवेत- विध्यर्थ प्र. पु. ए. व. of सेव्- सेवते १ ग. आ. प. to serve, attend to, च- अपि- न-no, not - all अव्ययs

उत्पाद्य पुत्राननृणांश्च कृत्वा
वृत्तिं च तेभ्योऽनुविधाय काञ्चित् ।
स्थाने कुमारीः प्रतिपाद्य सर्वा
अरण्यसंस्थो मुनिवद्बुभूषेत् ॥१३४॥- महाभा ५.३७.३५ (सुधर्म)

(गृहस्थः) पुत्रान् उत्पाद्य, (तान्) अनृणान् कृत्वा च, तेभ्यः काञ्चित् वृत्तिम् च अनुविधाय, सर्वाः कुमारीः स्थाने प्रतिपाद्य, अरण्यसंस्थः मुनिवद् बुभूषेत्॥

A householder should beget children, should keep them debt-free, prepare them to earn their living and ensure that all daughters are married in worthy families. Then he should become a forest dweller and live like a sage.

पुत्रान् & अनृणान्- both पु. लि. द्वि. वि. ब. व. of पुत्रः- son, child & अनृणः- one who is debt-free- ऋणम्- debt- न ऋणम्- अनृणम्- नञ् तत्पुरुष स.- यस्य ऋणम् न वर्तते सः- अनृणः, उत्पाद्य- after producing, giving birth, अनुविधाय- after assigning & प्रतिपाद्य- after giving away, presenting- all पू. का. वा. ल्यबन्त धा. सा. अव्यय of प्रयोजक उद्+ पद्- उत्पादयति- to produce, create- (पद्- पद्यते ४ ग. आ. प. to go, approach), अनु+ वि+ धा- to assign, arrange- (धा- दधाति- धत्ते ३ ग. उ. प. to place, set) & प्रयोजक of प्रति+ पद्- प्रतिपादयति- to present, give, कृत्वा- after doing- पू. का. वा. त्वान्त धा. सा. अव्यय of कृ-करोति कुरुते ८ ग. उ. प. to do, तेभ्यः- to them- पु. लि. च. व. ब. व. of तद्- he, काञ्चित् (कान्+ चित्) & वृत्तिम्- both स्त्री. लि. द्वि. वि. ए. व. of किम्+ चित्- some, whichever & वृत्ति- occupation, business, mode of leading life, स्थाने- न. लि. स. वि. ए. व. of स्थानम्- proper place, house सर्वाः & कुमारीः- both स्त्री. लि. द्वि. वि. ब. व. of सर्व- all, entire & कुमारी- a girl, maiden, daughter in general, अरण्यसंस्थः- पु. लि. प्र. व. ए. व.- forest dweller, keeping detached- अरण्य- forest, wilderness, संस्थ- adjctv- staying, dwelling- अरण्ये संतिष्ठति इति- अरण्यसंस्थः- स. तत्पुरुष, मुनिवद्- like a ascetic, sage- मुनिः- sage, ascetic, वद् (वत्)- अव्यय- an affix to noun or adjctv implies resemblance, likeness, बुभूषेत्- विध्यर्थ प्र. पु. ए. व. of बुभूष्- बुभूषति- १ ग. प. प. to with to become, wishing to be, च- and

इष्टं च मे स्यादितरच्च न स्यादेतत्कृते कर्मविधिः प्रवृत्तः
इष्टं त्वनिष्टं च न मा भजेतेत्येतत्कृते ज्ञानविधिः प्रवृत्तः ॥१३५॥ -महाभा शान्ति. १२.२०१.११

मे कर्मविधिः इष्टम् च स्यात् इतरः च न स्यात्, एतद् कृते प्रवृत्तः (अस्ति) । ज्ञानविधिः इष्टम् तु अनिष्टम् च न मा भजेत इति एतद् कृते प्रवृत्तः (अस्ति) ॥

The purpose of my (routine) activities should be to secure the desirable and avoid the undesirable. However, let my intellectual behaviour be not affected whether (the result) is desirable or undesirable.

कर्मविधिः- action plans, performance criteria- कर्मन्- न. लि.- Action, work, विधिः- पु. लिं- performance, behaviour, manner- कर्मणः विधिः- कर्मविधिः & ज्ञानविधिः- conscious behaviour, behaviour based on intellect, enlightenment- ज्ञान- knowledge, consciousness- ज्ञानस्य विधिः- ज्ञानविधिः- both ष. तत्पुरुष स., इतरः- other, another, प्रवृत्तः- oriented, engaged in, bound- प्रवृत्त- क. भू. धा. वि. of प्र+ वृत्- (वृत्- वर्तते १ ग. आ. प. to exist, to be)- all in पु. लिं. प्र. वि. ए. व., इष्टम्- desired, longed, न इष्टम्- अनिष्टम्- undesired, disliked- नञ् तत्पुरुष स.- इष्ट- क. भू. धा. वि. of इष्- इच्छति ६ ग. प. प. to wish, desire, एतद्- this- all in न. लिं. प्र. वि. ए. व., मे (मह्यम्)- for me- च. वि. ए. व. of अस्मद्- I, भजेत- विध्यर्थ प्र.. पु. ए. व. of भज्- भजते १ ग. आ. प. to experience, enjoy, attend upon, follow & स्यात्- विध्यर्थ प्र.. पु. ए of अस्- २ ग. प. प. अस्ति- to exist, to be, कृते- for this purpose- स. वि. ए. व. of कृत- doing, purpose- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do, इति- a particle used to report the very words spoken- thus, in this manner, तु- but, on the other hand, मा- a particle of prohibition- lest, that not, च- and, न- no, not- all अव्ययs

अकर्मशीलं च महाशनं च लोकद्विष्टं बहुमायं नृशंसम् ।
अदेशकालज्ञमनिष्टवेषमेतान्गृहे न प्रतिवासयीत ॥१३६॥ -महाभा. उद्योगपर्व ५. ३७.३५

अकर्मशीलम्, च महाशनम् च लोकद्विष्टम्, बहुमायम्, नृशंसम्, अदेशकालज्ञम् (तथा) अनिष्टवेषम्, एतान् गृहे न प्रतिवासयीत॥

One should not shelter a person in his home, who is lazy, a big eater, is hated by people, a big fraud, malicious in nature, one who lacks a sense of place and time or dresses in unacceptable clothes.

अकर्मशीलम्, महाशनम्, लोकद्विष्टम्, बहुमायम्, अदेशकालज्ञम्, अनिष्टवेषम् & नृशंसम्- all पु. लिं. द्वि. वि. ए. व. of अकर्मशीलः- habitually an idle person- कर्मन्- work, duty, न कर्मन्- अकर्मन्- नञ् तत्पुरुष स., शीलः- character, behaviour, अकर्म एव शीलः यस्य सः- अकर्मशीलः, महाशनः- a gready eater- महत्- adjctv- great, big, copious अशनम्- act of eating- महत् अशनम् यस्य सः- महाशनः, लोकद्विष्टः- one who is disliked by people- लोकः- people, द्विष्ट- hated, hostile- क. भू. धा. वि. of द्विष्- द्वेष्टि द्विष्टे २ उ. प. to hate, to hate- लोकैः द्विष्टः यः सः- लोकद्विष्टः, बहुमायः- one who is a great conjurer- बहु- adjctv- many, large number, माया- deceit, fraud, trick, मायः- conjurer, juggler- बहवः मायाः यस्य सः, अदेशकालज्ञः- one who does not have sense of place and time- देशः- place, region, काल- time, period- देशः च कालः च- देशकालौ- द्वंद्व स.- देशकालौ यः जानाति सः- देशकालज्ञः- न देशकालज्ञः- अदेशकालज्ञः- नञ् तत्पुरुष स.,

अनिष्टवेषः- one who dresses in undesirable or unacceptable clothes- इष्ट- desired, wanted- क. भू. धा. वि. of इष्- इच्छति ६. ग. प. प. to desire, want- न इष्ट- अनिष्ट- नञ् तत्पुरुष स., अनिष्टम् वेषः यस्य सः- अनिष्टवेषः- all above- बहुव्रीही स., नृशंसः- malicious or cruel person, एतान् - पु. लिं. द्वि. वि. ब. व. of एतद्- he, गृहे- न. लिं. स. वि. ए. व. of गृहम्- residence, house, home, प्रतिवासयीत- should be प्रतिवासयेत- allowed to stay near- प्रयोजक आ. प. विध्यर्थ प्र. प. ए. व. of प्रति+ वस्- प्रतिवासयति- ते- to dwell near, (वस्- वसति-१ ग. प. प. to dwell, inhabit, live, न- no, not, च-and- both अव्ययs

कदर्यकमाक्रोशकमश्रुतं च वनौकसं धूर्तममान्यमानिनम्
निष्ठूरिणं कृतवैरं कृतघ्नमेतान्भृशार्तोऽपि न जातु याचेत् ॥१३७॥ -महाभा उद्योग. ५. ३७.३६

भृशार्तः अपि कदर्यकम्, आक्रोशकम्, अश्रुतम्, च वनौकसम्, धूर्तम्, अमान्यमानिनम्, निष्ठूरिणम्, कृतवैरम्, कृतघ्नम् एतान् न जातु याचेत्॥

A person, however distressed he may be, should never solicit anything from a miser, an abusing person, an uneducated person, a person living in a forest, a cunning person, one who believes in wrong things, a cruel person, one who nurtures animosity and an ungrateful person.

भृशार्तः- intensely afflicted- भृश- adjctv- excessive, intense, very much & आर्त- adjctv- afflicted, suffering- भृशः आर्तः यस्य सः- भृशार्तः- बहुव्रीहि स.- पु. लिं. प्र. वि. ए. व., आक्रोशकम्, अश्रुतम्, अमान्यमानिनम्, कदर्यकम्, वनौकसम्, धूर्तम्, निष्ठूरिणम्, कृतवैरम् & कृतघ्नम्- पु. लिं. द्वि. वि. ए. व. of आक्रोशकः- an abusing person- आक्रोश- crying out, loud cry, blame- आक्रोशम् करोति इति- उपपद तत्पुरुषस., अश्रुतः- uneducated- श्रुतः- learned, well-known- न श्रुतः- अश्रुतः- नञ् तत्पुरुष स., अमान्यमानिनः- one who believes in unbelievable- मान्य- respectable, believable- (also माननीय, मन्तव्य)- क. वि. धा. सा. वि. of मन्- मन्यते ४ ग. आ. प. to believe- न मान्य- अमान्य- नञ् तत्पुरुष स.- अमान्यम् मानयति यः सः- अमान्यमानिनः- बहुव्रीहि स., कदर्यकः- कदर्यः (कृपणः)- miser, wretched, helpless- कदर्यम् करोति इति- कदर्यकः- उपपद तत्पुरुष स., वनौकसः- a person staying in a forest- वनम्- forest, ओकस् (ओकः)- residence, dwelling- वनम् ओकः यस्य सः- वनौकसः- बहुव्रीहि स., धूर्तः- a cunning person, cheat, निष्ठूरिन्- hard- hearted, cruel - निष्ठुर- adctv- hard, cruel- यस्य वर्तनम् निष्ठुरम् सः- निष्ठूरिन्- बहुव्रीहि स., कृतवैरः- one who nurtures animosity- कृत- done, accomplished- क. भू. धा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. & वैरम्- animosity- कृतम् वैरम् येन सः- बहुव्रीहि स. & कृतघ्नः- ungrateful- कृतम् हन्ति इति- कृतघ्नः- उपपद तत्पुरुष स., एतान्- पु. लिं. द्वि. वि. ब. व. of एतद्- this, it, याचेत्- विध्यर्थ प. प. प्र. पु. ए. व. of याच्- याचते १ ग. आ. प. (rarely प. प.)- to beg, solicit ask, जातु- a particle meaning: at all, at any time, possibly perhaps- न जातु- never, in no circumstances, अपि- also, even, च- and, न- no, not all अव्ययs

हितं यत् सर्वभूतानामात्मनश्च सुखावहम्।
तत् कुर्यादीश्वरे ह्येतन्मूलं सर्वार्थसिद्धये ॥१३८॥ -महाभा. उद्योग. -३७.४० (सुधर्म)

यद् सर्वभूतानाम् हितम्, आत्मनः च सुखावहम् (अस्ति), तद् (कर्म) ईश्वरे कुर्यात्। एतद् हि सर्वार्थसिद्धये मूलम् (भवति) ॥

One should do whatever is beneficial for all living beings and which gives happiness to oneself, in the service of God. That alone is the basis for all fulfillments of purpose (of life).

यद्- which, हितम्- beneficial advantageous, suitable- हित- क.भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, please, सुखावहम्- one that gives happiness- सुखम्- happiness, joy- सुखे वहति इति- सुखावहम्- उपपद तत्पुरुष स., तद्-that, it, मूलम्- root, basis, foundation & एतद्- that, it- all in न. लिं. प्र. वि. ए. व., सर्वभूतानाम्- पु. लिं. ष. वि. ब. व. of सर्वभूतम्- entire living being- सर्वम्- all, entire, whole, भूतम्- living being- सर्वम् भूतम्- सर्वभूतम्- वि. पू. प. क. स., आत्मनः- पु. लिं. ष. वि. ए. व. of आत्मन्- self, one's own, ईश्वरे- पु. लिं. स. वि. ए. व. of ईश्वरः- God, Almighty, सर्वार्थसिद्धये- स्त्री. लिं. च. वि. ए. व. of सर्वार्थसिद्धिः- fulfillment of entire purpose, desire- सर्वः- all, entire, अर्थः- purpose, intention, meaning- सर्वः अर्थः- सर्वार्थः- वि. पू. प. क. स., सिद्धिः- fulfillment, accomplishment- सर्वार्थाणाम् सिद्धिः- सर्वार्थसिद्धिः- ष. तत्पुरुष स., कुर्यात्- विध्यर्थ प. प. प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, make- च- and, हि- indeed, surely- both अव्ययs

वृद्धिः प्रभावस्तेजश्च सत्वमुत्थानमेव च।
व्यवसायश्च यस्य स्यात्तस्यावृत्तिभयं कुतः ॥१३९॥ - महाभा उद्योग. ५.३७. ४१ (सुधर्मा)

यस्य, वृद्धिः, प्रभावः, तेजः, च सत्वम्, उत्थानम् एव च, च व्यवसायः स्यात्, तस्य अवृत्तिभयम् कुतः (भवेत्) ?

Where is the fear of not having means of living for the one who has ability to prosper, strength, brightness, natural vitality, ability to rise up and industrious attitude ?

यस्य & तस्य both in पु. लिं. ष. वि. ए. व. of यद्- who, तद्-he, वृद्धिः- growth, progress- (वृध्- वर्धते १ ग. आ. प. to to prosper, increase, grow)- स्त्री. लिं. प्र. वि. ए. व., प्रभावः- strength, efficacy, power, तेजः- brightness, sharpness & व्यवसायः- effort, perseverance, resolve -all in पु. लिं. प्र. वि. ए. व., सत्वम्- natural disposition, vitality, उत्थानम्- ability to rise, resurrection & अवृत्तिभयम्- fear of having no means of living- वृत्तिः- स्त्री. लि.- means of living, employment, occupation- न वृत्तिः- अवृत्तिः- नञ् तत्पुरुष स., भयम्- fear, dread- अवृत्तेः भयम्- अवृत्तिभयम्- ष. तत्पुरुष स.- all in न. लिं. प्र. वि. ए. व., स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्-अस्ति २ ग. प. प. to be, to exist, च- and, एव- just, mere, only & कुतः (कुतस्)- how, from where, why- all अव्ययs

आरोग्यं विद्वत्ता सज्जनमैत्री महाकुले जन्म।
स्वाधीनता च पुंसां महदैश्वर्यं विनाप्यर्थैः ॥१४०॥ -- courtesy शारदाप्रकाश-संघ

पुंसाम् आरोग्यम्, विद्वत्ता, सज्जनमैत्री, महाकुले जन्म, स्वाधीनता च, विना अपि अर्थैः, महदैश्वर्यम् (भवति) ॥

Good health, wisdom, friendship of good people, birth in a noble family and self-independence are the greatest assets for men, even without any material wealth.

पुंसाम्- पु. लिं. ष. वि. ब. व. of पुंस्- a man, a male, आरोग्यम्- good health, जन्म- (जन्मन्)- birth, origin, महदैश्वर्यम्- a greatest wealth- all in न. लिं. प्र. वि. ए. व., महत् ऐश्वर्यम्- वि. पू. प. क. स; विद्वत्ता- wisdom, scholarship- (विद्वस्-adjctv- knowing, wise, learned- विद्वान्- पु. लिं., विदुषी- स्त्री. लि. & विद्वत्- न. लिं), सज्जनमैत्री- friendship with noble people- सज्जनः- noble people- सत्- good, noble, जनः- person people- सत् जनः- सज्जनः- प्रादि कर्मधारय स., मैत्री- friendship, goodwill- सत्जनानाम् मैत्री- सज्जनमैत्री- ष. तत्पुरुष स. & स्वाधीनता- independence, freedom- स्व- pron. adjctv- one's own, belonging to oneself, अधीन- depend on, subservient, आधीनता- dependence- स्वस्य आधीनता- स्वाधीनता- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., महाकुले- न. लिं. स. वि. ए. व. of महाकुलम्- a great family, descent- महत्- big, great noble, कुलम्- race, family, descent- महत् कुलम्- महाकुलम्- वि. पू. प. क. स., अर्थै- पु. लिं. तृ. वि. ब. व. of अर्थ- wealth, riches, property, च-and, विना- without, except, bereft of, अपि- even also- all अव्ययs

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते ॥१४१अ॥

इदमन्धंतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारन्न दीप्यते ॥१४१ब॥ -दिण्डिनः काव्यादर्शः प्र. प. ३&४

वाचाम् एव प्रसादेन इह शिष्टानुशिष्टानाम् शिष्टानाम् अपि सर्वथा लोकयात्रा प्रवर्तते। इदम् भुवनत्रयम् कृत्स्नम् अन्धंतमः जायेत, यदि शब्दाह्वयम् ज्योतिः आसंसारम् न दीप्यते॥

The entire functioning of this world depends upon communication between the wise, their followers and other educated people. All three worlds would be very dark, if light of communication does not illuminate this entire world.

(Facebook, emails, cellphone, Satellites, ISS, JWST !!)

वाचाम्- स्त्री. लिं. ष. वि. ब. व. of वाच्- talk, speech, language प्रसादेन- पु. लिं. तृ. वि. ए. व. of प्रसादः- courtesy, gift, kindness, help- शिष्टानाम् & शिष्टानुशिष्टानाम् both- पु. लिं. ष. वि. ब. व. of शिष्टः- an educated, trained, wise, gentleman, disciplined person,- क. भू. धा. वि. of शिष्- शिनष्टि ७ ग. प. प. to distinguish from other & शिष्टानुशिष्ट- well-educated as well as those getting trained अनु-अव्यय- along, after, under, follow- अनुशिष्टः- instructed, taught, ordered, commanded- शिष्टः च अनुशिष्टः च- शिष्टानुशिष्टः- द्वंद्व स., लोकयात्रा- interaction in this world- लोकः- world, people, common life, यात्रा- going, motion, journey, intercourse- लोके यात्रा- लोकयात्रा- स. तत्पुरुष स., प्रवर्तते- वर्त. प्र.तृ. पु. ए. व. of प्र+ वृत्- to go forward, move on, commence- (वृत्- वर्तते १ ग. आ. प. to be, to exist), शब्दाह्वयम्- sound named (appellated)- शब्द- sound, note of birds, animals, men etc- आह्वयः- a name, appellation- as last member of composition- (e.g. काव्यम् रामायणाह्वयम्)- शब्दम् इति आह्वयम्- शब्दाह्वयम्- कर्मधारय स. & ज्योतिः (ज्योतिस्)- light, brightness, lustre, this, भुवनत्रयम्- all three worlds- भुवन- a world, earth, त्रयम्- a triad, group of three- त्रयाणाम् भुवनानाम् समाहारः- भुवनत्रयम्- न. लिं. ए. व.

द्विगु स., कृत्स्नम्- adjctv- all, entire, whole & अन्धंतमः- total darkness- अन्ध- adjctv- blind, darkness & तमः (तमस्)- darkness- अन्धम् तमः- अन्धंतमः- total darkness- all in न. लिं. प्र. वि. ए. व., आसंसारम्- पु. लिं. द्वि. वि. ए. व. of आसंसारः- entire course or circuit of the worldly life, mundane existence of the world- संसारः- worldly life- संसारम् अभिव्याप्य- आसंसारः- अव्ययीभाव स., जायेत- विध्यर्थ तृ. पु. ए. व. of जन्- जायते ४ ग. आ. प. to be, to become, to be born, दीप्यते- वर्त. प्र. पु. ए. व. of दीप्- ४ ग. आ. प. to shine, blaze, illuminate, glow, इह- here, in this world, एव- mere, only, just, न- no, not, यदि- if, in case, अपि- also, even, सर्वथा- in every way, by all means, at all, altogether- all अव्ययs

किं तस्य तपसा राज्ञः किं च तस्याध्वरैरपि।
सुपालितप्रजो यः स्यात् सर्वधर्मविदेव सः॥१४२॥ -महाभा. शान्तिपर्व १२.६९.७१

यः (राजा) सुपालितप्रजः स्यात्, सः सर्वधर्मविद् एव (भवति)। तस्य राज्ञः तपसा किम् (प्रयोजनम् अस्ति)। (तथा) तस्य अध्वरैः अपि किम् च (प्रयोजनम् अस्ति) ॥

A King, who looks after (the well being of) his subjects very well, knows all the right codes of conduct (Dharma). Why does he need to observe any austerities? In addition, why does he need even to conduct other religious ceremonies?

यः (यद्)- सुपालितप्रजः- one whose subjects are well protected- सु- अव्यय- prefix implies good, well, पालित- protected, looked after, cared for- प्रयोजक क. भू. धा वि. of पा-पालयति- ते- (पा-पाति २ ग. प. प. to protect, preserve), प्रजा- subject, people, progeny- सम्यक पालितः - सुपालितः- प्रादि कर्मधारय स. & सुपालिता प्रजा येन सः- सुपालितप्रजः- बहुव्रीहि स., सः (तद्)- he & सर्वधर्मविद्- one who knows all codes of conduct (Dharma)- सर्व- all, entire, धर्म- codes of conduct- सर्वम् धर्मम्- सर्वधर्मम्- कर्मधारय स. & सर्वधर्माणि वेत्ति इति- सर्वधर्मविद्- उपपद तत्पुरुष स.- all in पु. लिं. प्र. वि. ए. व., स्यात्- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist, तस्य & राज्ञः- both in पु. लिं. ष. वि. ए. व. of तद्- he & राजन्- King, तपसा- न. लिं. तृ. वि. ए. व. of तपस्- penance, religious austerity, अध्वरैः- पु. लिं. तृ. वि. ब. व. of अध्वरः- religious sacrifice, ceremony, किम्- interrogative particle- what, why, च- and, एव- just, mere, only, अपि- also, even- all अव्ययःs

परार्थे सहते कष्टं स्वभावाद्यस्तु सज्जनः।
निष्पीडनादपि रसं इक्षुदण्डः प्रयच्छति ॥१४३॥ - - courtesy सुधर्मादिनपत्रिका

यः सज्जनः, (सः) परार्थे स्वभावात् तु कष्टम् सहते। इक्षुदण्डः निष्पीडनात् अपि रसम् प्रयच्छति॥

A noble person endures difficulties for the benefit of others due to his inherent nature. . A sugarcane stalk gives out juice even after being squeezed badly.

यः (यद्)- who, सज्जनः- a noble person, सत्- good, noble, जनः- person- सत् जनः- सज्जनः- कर्मधारय स., इक्षुदण्डः- a sugarcane stick, इक्षुः- sugarcane, दण्डः- stick, rod, cane- इक्षोः दण्डः- इक्षुदण्डः- ष. तत्पुरुष

स.- all in पु. लिं. प्र. वि. ए. व.,कष्टम् & रसम्- both in पु/न. लिं. प्र. वि. ए. व. of कष्टम्- difficulty, trouble, suffering & रसम्- juice, an object of taste, परार्थे- in पु/न. लिं. स. वि. ए. व. of परार्थ- for the sake of others- परः- other, अर्थः- purpose, benefit- परस्य अर्थः- परार्थः- ष. तत्पुरुष स., स्वभावात् & निष्पीडनात्- both in पं. वि. ए. व. of स्वभावः- constitution, characteristic, inherent nature- स्व- one's own, self, भावः- manner, state of being- स्वस्य भावः- स्वभावः- ष. तत्पुरुष स. & निष्पीडन- fully squeezing, pressing well- (पीड्- पीडयति-ते to torment, pain, injure- निस्- अव्यय- prefix to verbs implies fullness, transgression), सहते & प्रयच्छति- both वर्त. प्र. पु. ए. व. of सह्- to ensure, tolerate & प्र+ दा- to give, grant, offer- (दा- यच्छति- १ ग. प. प. to give), अपि- even, also & तु- but, on the other hand-both- अव्ययs

पात्रं न तापयति नैव मलं प्रसूते
स्नेहं न संहरति नैव गुणान् क्षिणोति।
द्रव्यावसानसमये चलतां न धत्ते

सत्पुत्र एव कुलसद्मनि कोऽपि दीपः॥१४४॥

सत्पुत्रः कुलसद्मनि कः अपि दीपः एव (भवति) । (किन्तु सः) पात्रम् न तापयति, न एव मलम् प्रसूते, स्नेहम् न संहरति, न एव गुणान् क्षिणोति। (सः) द्रव्यावसानसमये चलताम् न धत्ते॥

(Here, the author compares a worthy son to a bright lamp, minus its drawbacks, using double-meaning words)

A virtuous son, indeed, is some kind of a lamp illuminating his entire family (कुलदीपकः)! (However), unlike a lamp, he does not heat the holder (create problems in the house), nor produces any dirt (black smoke) (does not bring disrepute). He does not consume oil (does not destroy friendship), nor diminishes the wick (does not damage familie's good qualities). At the loss of oil (wealth), he does not leave the family (but continues working).

पात्रम्, मलम् & स्नेहम्- all in पु/न. लिं. द्वि. वि. ए. व. of पात्र- pot, receptacle, container- also means: fit or worthy person, मल- dirt, filth, impurity & स्नेह- oil, fat, also meas: affection, love tenderness, गुणान्- पु. लिं. द्वि. वि. ब. व. of गुण- virtue, quality also means: wick of a lamp, cord, तापयति- वर्त. प्र. पु. ए. व. of प्रयोजक of तप्- to cause to heat up- (तप्- तपति १ ग. प. प. to be hot, to blaze), प्रसूते, संहरति, क्षिणोति & धत्ते- all in वर्त. प्र. पु. ए. व प्र+ सू- to bring forth, produce- (सू- सूते- २ ग. आ.प. to produce), सं+ हृ- to destroy- (हृ- हरति- ते १ ग. उ. प. to take, carry), क्षि- क्षिणोति ९ ग. प. प. to diminish, to waste, ruin & धा- दधाति- धत्ते ३ ग. उ. प. to hold, put on, sustain, द्रव्यावसानसमये- पु. लिं. स. वि. ए. व. of द्रव्यावसानसमयः- time of loss of material/wealth- द्रव्य- material, wealth, अवसान- stopping, end, conclusion- द्रव्यस्य अवसानम्- द्रव्यावसानम् & द्रव्यावसानस्य समयः- द्रव्यावसानसमयः- both ष. तत्पुरुष स., कुलसद्मनि- न. लिं. स. वि. ए. व. of कुलसद्मन्- family's household- कुलम्- race family, सद्मन्- house, dwelling- कुलस्य सद्म- कुलसद्म- ष. तत्पुरुष स., चलताम्- स्त्री. लिं. द्वि. वि. ए. व. of चलता- ongoing, continuity- (चल्- चलति- १ ग. प. प. to move, go- चल- adjctv- moving), सत्पुत्रः- virtuous son- सत्- good, noble, पुत्रः- son, कः (किम्)- who & दीपः- lamp, light- all in पु. लिं. प्र. वि. ए. व., न- no not, एव- just, mere, only, न एव- not at all, अपि- even, also, and- all अव्ययs

विना कार्येण ये मूढाः गच्छन्ति परमन्दिरम् ।
अवश्यं लघुतां यान्ति कृष्णपक्षे यथा शशी ॥१४५॥ -सुभाषित रत्नावली

ये मूढाः विना कार्येण परमन्दिरम् गच्छन्ति, (ते) यथा कृष्णपक्षे शशी (इव), अवश्यम् लघुताम् यान्ति॥

Those foolish people, who visit houses of others without any reason, certainly attain humiliation, just like the waning Moon of the dark fortnight.

ये & मूढाः- पु. लिं. प्र. वि. ब. व. of यद्- who & मूढ- stupid, dull, foolish- क. भू. धा. वि. of मुह्- मुह्यति ४ ग. प. प. foolish, stupid, कार्येण- in न. लिं. तृ. वि. ए. व. of कार्यम्- work, business, purpose- कार्य- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. उ. प. to do), परमन्दिरम्- house of other person- पर- adjctv- other, another, मन्दिरम्- house, dwelling- परस्य मन्दिरम्- परमन्दिरम्- ष. तत्पुरुष स.- in न. लिं. द्वि. वि. ए. व., कृष्णपक्षे- पु. लिं. स. वि. ए. व. of कृष्णपक्ष- dark half of a lunar month- कृष्ण- adjctv- black, dark- पक्षः- the half of the lunar month- कृष्णः पक्षः- कृष्णपक्षः- वि. पू. प. क. धा. स., शशी (शशिन्)- Moon- पु. लिं. प्र. वि. ए. व., लघुताम्- स्त्री. लिं. द्वि. वि. ए. व. of लघुता- smallness, contempt, loss of dignity- (लघु- adjctv- diminutive, small, insignificant) यान्ति & गच्छन्ति- both in वर्त. प्र. पु. ब. व. of या- याति २ ग. प. प. to go, to be reduced to, to go to & गम्- गच्छति १ ग. प. प. to go, under go, विना- without, devoid of & यथा- like, in which way or manner, अवश्यम्- inevitably, certainly necessarily- all अव्ययs

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥१४६॥ -हितोपदेशे मित्रलाभः १७१

(मनुष्यः) वृत्त्यर्थम् न अतिचेष्टेत । सा (वृत्तिः) हि धात्रा एव निर्मिता (भवति) । जन्तौ मातुः गर्भात् उत्पतिते (हि तस्याः), स्तनौ प्रस्रवतः॥

One need not exert himself too much (but still just enough) to find means of livelihood. The Creator himself has provided the means for it. A mother's breasts produce milk, just after a living being emerges out of her womb. (The baby still needs to suck !)

वृत्त्यर्थम्- for the purpose of living- वृत्तिः- स्त्री. लिं.-Existence, means of livelihood, अर्थम्- purpose, means, reason- वृत्तेः अर्थम्- वृत्त्यर्थम्- ष. तत्पुरुष स.- न. लिं. प्र. वि. ए. व., अतिचेष्टेत- विध्यर्थ तृ. पु. ए. व. of अति+ चेष्ट्- excessively struggle, over perform- (चेष्ट्- चेष्टते १ ग. आ. प. to be active, endeavour, make effort), सा (तद्)- she & निर्मिता- produced, created- निर्मित- क. भू. धा. वि. of निर् (निस्)+ मा- to create, produce- (मा- माति २ ग. प. प. to measure, limit)- both स्त्री. लिं. प्र. वि. ए. व., धात्रा- पु. लिं. तृ. वि. ए. व. of- धातृ- the creator, epithet of Brahma, जन्तौ & उत्पतिते- पु. लिं. स. वि. ए. व. of जन्तुः- creature, a living being & उत्पतित- emerged into view, produced, originated- क. भू. धा. वि. of उद्+ पत्- (पत्-

पतति १ ग. प. प. to fall, alight), मातुः- स्त्री. लिं. ष. वि. ए. व. of मातृ- mother, गर्भात्- पु. लिं. पं. वि. ए. व. of गर्भः- womb, belly, स्तनौ- पु. लिं. प्र. वि. द्वि. व. of स्तनः- the female breast, udder, प्रस्रवतः- वर्त. प्र. पु. द्वि. व. of प्र+ स्रु- to ooze out, pour out- (स्रु- स्रवति १ ग. प. प. to flow, stream), न- no, not, एव- just, mere, only, हि- surely, indeed- all अव्ययs

धर्मादपेतं यत्कर्म यद्यपि स्यान्महाफलम् ।
न तत्सेवेत मेधावी न तद्धितमिहोच्यते ॥१४७॥- महाभा शान्तिपर्व १२. २९९. ८

मेधावी तद् कर्म न सेवेत यद् धर्मात् अपेतम् (अस्ति), यदि अपि (तद्) महाफलम् स्यात् । इह न तद् हितम् उच्यते॥

A wise person should not undertake any work, which is against right way of conduct (Dharma), even if it is highly rewarding. It is not beneficial in this world.

यद्- which, कर्म- न. लिं. प्र.. वि. ए. व of कर्मन् -work, job, duty, action, अपेतम्- deviating from, contrary, deprived of, free from- अपेत- क. भू. धा. वि. of अप+ इ- (इ- एति २ ग. प. प. to go, to go to), तद्- that, it, महाफलम्- highly rewarding, very beneficial, very profitable- महत्- adjctv- great, big, huge, फलम्- fruit, result, consequence, yield- महत् फलम् - कर्मधारयस. & हितम्- beneficial, good, advantageous- हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, cast, धर्मात्- पु/न. लिं. पं. वि. ए. व. of धर्म- prescribed codes of conduct, duty (Dharma), स्यात् & सेवेत- both- विध्यर्थ प्र. पु. ए. व. of अस्- अस्ति २ ग. प. प. to be, to exist & सेव्- सेवते १ ग. आ. प. to serve, attend to, indulge in, मेधावी (मेधाविन्)- intelligent, knowledgeable- person- पु. लिं. प्र. वि. ए. व., उच्यते- कर्मणी प्रयोग वर्त. तृ. पु. ए. व. of वच्- वक्ति- उवाच २ ग. प. प. to say, speak, इह- here, in this world, न- no, not, यदि- if, in case, अपि-even, also-all अव्ययs

पात्रे दानं स्वल्पमपि काले दत्तं युधिष्ठिर ।
मनसा हि विशुद्धेन प्रेत्यानन्तफलं स्मृतम् ॥१४८॥ -महाभा अरण्यपर्व ३.२६०.३४

युधिष्ठिर, दानम्, स्वल्पम् अपि, पात्रे, विशुद्धेन मनसा, काले दत्तम्, प्रेत्य हि, अनन्तफलम् स्मृतम् ॥

(Said by Vyasa Mahamuni to Yudhisthir)

Oh, Yudhistir, a donation, however small, given to a worthy person, with a pure mind, at the appropriate time, is said to give endless benefits even after death.

युधिष्ठिर- पु. लिं. सं. वि. ए. व. -(युध् - स्त्री. लिं.- war, battle- युधि स्थिरः यः सः- बहुव्रीहि स.), स्थिरः - dependable, stable, दानम्- donation, giving, gift, present, स्वल्पम्- adjctv- very small, little- (अल्पम्- little, small- सु+ अल्पम्- स्वल्पम्), दत्तम्- given, granted, offered- दत्त- क. भू. धा. वि. of दा- ददाति- दत्ते ३. ग. उ. प. to give, grant, अनन्तफलम्- infinite gains- अन्तम्- end, limit- न अन्तम्- अनन्तम्- infinite, endless- नञ् तत्पुरुष स., फलम्- fruit, result, reward- अनन्तम् फलम्- अनन्तफलम्- वि. पू. प. क.

स. & स्मृतम्- said, laid down- स्मृत- क. भू. धा. वि. of स्मृ- स्मरति १ ग. प. प. to lay down, consider, remember- all in- न. लिं. द्वि. वि. ए. व., पात्रे & काले- both पु/न. लिं. स. वि. ए. व. of पात्र- receptacle of any kind, recipient, fit or worthy person & काल- time, period, occasion, विशुद्धेन & मनसा- both न. लिं. तृ. वि. ए. व. of विशुद्धम्- very pure, clean, spotless - (विशुद्ध- क. भू. धा. वि. of वि+ शुध्- शुध्यति ४ प. प. to become pure) & मनस्- mind, heart, thinking, अपि- also, even, प्रेत्य- having departed, after death in the next world- (प्रेत्य- also क. वि. धा. सा. वि. of प्र+ इ, इ- एति २ ग. प. प. to go) & हि- surely, indeed- all अव्ययs.

संभोजनं संकथनं संप्रश्नोऽथ समागमः ।
एतानि ज्ञातिकार्याणि न विरोधः कदाचन ॥१४९॥ -महाभा उद्योगपर्व ५.६४.११

संभोजनम्, संकथनम्, संप्रश्नः, अथ समागमः, एतानि ज्ञातिकार्याणि (सन्ति)। (तेषां) विरोधः न कदाचन (क्रियते)॥

Enjoying meals together, discussing things together, enquiring about each other and meeting socially are basic duties among relatives and friends. One should never oppose them!

सम्- अव्यय- as a prefix to verb and verbal derivatives it means: together- भोजनम्- eating, eating food- संभोजनम् eating food together & संकथनम्- discussing together- both न. लिं. प्र. वि. ए. व., संप्रश्नः- enquiring with each other, समागमः- meeting together, union & विरोधः -opposition, obstruction, quarrel- all in पु. लिं. प्र. वि. ए. व., एतानि & ज्ञातिकार्याणि- both न. लिं. प्र. वि. ब. व. of एतद्- this, it & ज्ञातिकार्यम्- duty of relationship- ज्ञातिः- a relative, intimately aquainted, relationship, कार्यम्- duty, thing to be done- कार्य- (also करणीय, कर्तव्य & कृत्य)- क. वि. धा. सा. वि. of कृ- करोति- कुरुते ८ ग. प. प. to do)- ज्ञातेः कार्यम् - ज्ञातिकार्यम्- ष. तत्पुरुष स., अथ- then, likewise, and, also, न- no, not, कदा- when, at what time, कदाचन- at some time, one day, न कदाचन- never- all अव्ययs

सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः।
विद्यते न हि स कश्चिदुपायः सर्वलोकपरितोषकरो यः ॥१५०॥

जनः सर्वथा स्वहितम् आचरणीयम् (कुर्यात्)। बहुजल्पः किम् करिष्यति? कश्चित् सः उपायः न हि विद्यते, यः सर्वलोकपरितोषकरः (भवति) ॥

By all means, one should act in his own interest! What will a constantly criticizing person do? There is no one solution, which satisfies all the people.

स्वहितम्- self-interest, thing that is beneficial to oneself- स्व- one's own, self, हितम्- good, welfare- हित- क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, cast- स्वस्य हितम्- स्वहितम्- ष. तत्पुरुष स. & आचरणीयम्- to be attended to, to be performed, to be practiced- आचरणीय- (also- आचरितव्य & आचर्य)- क. वि. धा. सा. वि. of आ+ चर्- (चर्- चरति १ ग. प. प. to move, go)- both in न. लिं. द्वि. वि. ए. व.,

बहुजल्प:- all the time discoursing, merely talking- बहु- adjctv- many, very much large, जल्प:- gossiping, debating, prattling- (जल्प्- जल्पति १ ग. प. प. to talk, babble)- बहु जल्पति यः सः- बहुजल्प:- बहुव्रीहि स., जनः- people, सः (तद्)- he, यः (यद्)- who, सर्वलोकपरितोषकरः- one that is satisfying to all the people- सर्व- all, entire, whole, लोक- people, परि- अव्यय- excessively, very much, तोषः- satisfaction, delight, करः- causing, doing- सर्वः लोकः- सर्वलोकः- वि. पू. प. क. धा. स., तोषम् परिकृत्य- परितोषम्- अव्ययीभाव स., परितोषम् करोति इति -परितोषकरः- उपपद तत्पुरुष स. & सर्वलोकस्य परितोषकरः -ष. तत्पुरुष स, उपाय:- means, remedy, solution, stratagem & कश्चित्- (कः+ चित्)- some, any- all in पु. लिं. प्र. वि. ए. व., करिष्यति- सामान्य/द्वि. भविष्य प्र. पु. ए. व. of कृ- करोति- कुरुते ८ ग. उ. प. to do, विद्यते- वर्त. प्र.. पु. ए. व. of विद्- ४ ग. आ. प. to be, to exist, सर्वथा- in all respect, at all, altogether, किम्- a particle of interrogation: what, why, न- no, not, हि- surely indeed, न हि- not at all-

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥१५१॥ -हितोपदेशे मित्रलाभः १.३६

पुंसाम् अल्पकैः स्वकुलैः अपि संहतिः श्रेयसी (भवति)। तण्डुलाः, (क्षुद्रेण) तुषेण अपि परित्यक्ताः, न प्ररोहन्ति॥

It is better for men to live in company of their own relatives, even if they are of poor means. The rice grains do not germinate without their (lowly) chaffs,

पुंसाम्- पु. लि. ष. वि. ब. व. of पुंस्- man, human, स्वकुलैः & अल्पकैः -both in पु. लि. तृ. वि. ब. व. of स्वकुलः- of one's own family, race- स्व- one's own, self & कुलः- race, family- स्वस्य कुलः- स्वकुलः- ष. तत्पुरुष स. & अल्पक- adjctv- small, mean, contemptible, संहतिः- close contact, assemblage, compactness & श्रेयसी (श्रेयस्)- adjctv- beneficial, preferable, desirable- both स्त्री. लिं. प्र. वि. ए. व., तण्डुलाः & परित्यक्ताः- both in पु. लि. प्र. वि. ब. व. of तण्डुल- rice grain after thrashing, unhusking & परित्यक्त- abandoned, deprived or bereft of- क. भू. धा. वि. of परि+ त्यज्- to abandon- (त्यज्- त्यजति १ ग. प. प. to leave), तुषेण- in पु. लि. तृ. वि. ए. व. of तुषः- husk or chaff of grain, प्ररोहन्ति- वर्त. प्र. पु. ब. व. of प्र+ रुह्- to rise, germinate- (रुह्- रोहति-१ ग. प. प. to grow, spring up) अपि- even, also, न- no, not- अव्यय

हरेः पादाहतिः श्लाघ्या न श्लाघ्यं खररोहणम्।
निन्दाऽपि विदुषा युक्ता न युक्तो मूर्खसंस्तवः ॥१५२॥– सुभाषितरत्नभाण्डागार

पाभे: निन्दा =स्पर्धा & न युक्तो मूर्खसंस्तवः =न युक्ता मूर्खमित्रता

हरेः पादाहतिः श्लाघ्या (भवति, परन्तु), खररोहणम् न श्लाघ्यम् (भवति)। विदुषा युक्ता निन्दा /स्पर्धा अपि (श्लाघ्या भवति, परन्तु), मूर्खसंस्तवः युक्तः न (श्लाघ्यः भवति) /मूर्खमित्रता, युक्ता न (श्लाघ्या भवति)।

Striking a lion's foot is courageous (respectful) but notriding an ass. A criticism by a knowledgeable person is welcome but not the praise of a stupid person.

हरेः- पु. लि. ष. वि. ए. व. of हरिः- a lion, horse, ape, frog, cuckoo, snake, peacock etc. (also means Lord Vishnu) पादाहतिः- striking with foot- पादः- पु. लिं.- foot, आहतिः- स्त्री. लिं- striking, blow, hit, beating- पादेन आहतिः- पादाहतिः- तृ. तत्पुरुष स., श्लाघ्या- praiseworthy, respectable- (श्लाघ्य- क. भू. धा. वि. of श्लाघ्- श्लाघते १ आ. प. to praise, extol), युक्ता- inclusive of, accompanied by, with- (युक्त- क. भू. धा. वि. of युज्- युनक्ति- युंक्ते ७ ग. उ. प. to attach, connect, add, set), निन्दा- blame, accusation, criticism /स्पर्धा- competition, rivalry, envey- (स्पर्ध्- स्पर्धते १ ग. आ. प. to contend, compete) & मूर्खमित्रता- a friendship with a stupid person- मूर्खः- पु. लिं.- stupid or foolish, ignorant, मित्रता- स्त्री. लिं.- friendship- मूर्खस्य मित्रता- मूर्खमित्रता- ष. तत्पुरुष स.- all in स्त्री. लिं. प्र. वि. ए. व., खररोहणम्- riding or mounting a donkey- खरः- an ass, a donkey, आरोहणम्- riding or mounting (आ+रुह्- to mount, ascend- रुह्- रोहति १ ग. प. प. to grow)- खरे आरोहणम्- खररोहणम्- स. तत्पुरुष स., श्लाघ्यम्- praiseworthy- both न. लिं. प्र. वि. ए. व., विदुषा- in पु. लिं. तृ. वि. ए. व. of विद्वस्- a learned, or knowledgeable person, मूर्खसंस्तवः- praise or intimacy of a stupid person- मूर्खस्य संस्तवः- मूर्खसंस्तवः- ष. तत्पुरुष स. & युक्तः- see above- both पु. लिं. प्र. वि. ए. व., न- no, not, अपि- अव्यय- also, even-both अव्ययs

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ॥ १५३॥ -श्रीशंकराचार्यविरचितं विष्णुषट्पदीस्तोत्रं ३

नाथ, (मम तथा तव) भेदापगमे सति अपि, अहम् तव (अस्मि), त्वम् मामकीनः न (असि) । तरङ्गः सामुद्रः हि (अस्ति परन्तु), समुद्रः क्वचन तारङ्गः न (अस्ति) ॥

Oh, Master, though there is no difference (between the two of us), I am you but You are not I. A wave belongs to the sea but the sea is not made of waves.

(A wave and sea are both water; qualitywise but not quantitywise. Wave is part of sea. This is the key principle of non-duality.)

नाथ- Oh, Master, Lord- in सं. लिं. प्र. वि. ए. व., भेदापगमे & सति- both in पु. लिं. स. वि. ए. व. of भेदापगमः- No difference भेदः- difference, separation, division, अपगम- going away, disappearance, removal, falling off- (अप+ गम्- गच्छति १ ग. प. प.)- भेदस्य अपगमः- भेदापगमः- ष तत्पुरुष स. & सत्- happening, becoming, being, - वर्त. का. वा. धा. सा. वि. of अस्- अस्ति २ ग. प. प. to be, to exist, अहम् (अस्मद्)- I, Myself, त्वम् (युष्मद्)- you, मामकीनः- one who belongs to me alone- (मामकीन- adjctv- my, mine), तरङ्गः- a wave, तारङ्गः- one who belonging to a wave or made of wave, सामुद्रः- one who is belonging to sea, ocean- (समुद्रः- sea, ocean)- all in पु. लिं. प्र. वि. ए. व., तव- ष. वि. ए. व. of युष्मद् - you, क्व- where, when- क्व+चन- sometimes, in some place- न क्वचन- never, in no case, हि- indeed, surely, न- no, not, अपि- even also- all अव्ययs

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः ।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ॥१५४अ॥ Brahmajnanavalimala.20, attributed to Shankara

ग्रन्थकोटिभिः यद् उक्तम् (तद् अहम्) श्लोकार्धेन प्रवक्ष्यामि । 'ब्रह्म सत्यम् (अस्ति), जगत् मिथ्या (अस्ति)।
जीवः ब्रह्म एव न अपरः (अस्ति) ॥

I will tell you in half of a verse , what has been said in millions of holy books. "Brahman, the Supreme Self ", alone is the absolute truth and the world is an illusion. The essence of life (in all living beings) is Brahman alone and nothing else

ग्रन्थकोटिभिः- पु. लिं. तृ. वि. ब. व. of ग्रन्थकोटि- collection of ten million literary compositions- ग्रन्थः- literary composition, treatise, कोटिः- ten million- कोटय: ग्रन्था: - कर्मधारय स or कोटीनां ग्रन्थानां समाहारः, ग्रन्थकोटिः- द्विगु स., यद्- which, उक्तम्- said- (उक्त-क. भू. धा. वि. of वच्- वक्ति २ ग. प. प. to say, declare, ब्रह्म (ब्रह्मन्)- the Supreme being, all-prevading Spirit, Self, सत्यम्- truth, factual thing, reality, unchanging, जगत्- world, प्रवक्ष्यामि- सा./द्वि., भविष्य उ. पु. ए. व. of प्र+ वच्- to interpret, explain श्लोकार्धेन- पु. लिं. तृ. वि. ए. व. of श्लोकार्धः- श्लोकः- a hymn or verse of praise, अर्धः- adjctv- half- श्लोकस्य अर्धः- श्लोकार्धः- ष. तत्पुरुष स, जीवः- living being, life, existence, अपरः- another, someone else ,न- no, not, मिथ्या- false, in vain, deceitful- all अव्ययs

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् । परोपकारः पुण्याय पापाय परपीडनम् ॥१५४ब॥

व्यासस्य अष्टादशपुराणेषु (एतद्) वचनद्वयम् (एव सारः अस्ति) । 'परोपकारः पुण्याय (अस्ति तथा), परपीडनम् पापाय (अस्ति) ॥

The essence of the eighteen Puranas by Maharishi Vyasa can be condensed in two sentences, 'Doing well to others is a virtuous act (earning merit for the doer), and giving trouble to others is a sinful act'.

वचनद्वयम्- a pair of sayings- वचन- saying, declaration, affirmation, द्वयम्- a pair, couple- वचनयोः द्वयम् इति- वचनद्वयम्- ष. तत्पुरुष स. & परपीडनम्- troubling or torturing others- परः- other, troubling or torturing- परस्य पीडनम्- परपीडनम्- ष. तत्पुरुष स.- all in न. प्र. वि. ए. व., (वच्- see above), जीवः- - living being, life, existence, अपरः- another, someone else & परोपकारः- doing good to others- परः- other, other person, उपकारः- service, help, favour- परेभ्य: उपकारः- परोपकारः- च.. तत्पुरुष स.- in- पु. लिं. प्र. वि. ए. व., अष्टादशपुराणेषु- न. लिं. स. वि. ब. व. of अष्टादशपुराणम्- अष्टादशन्- eighteen, पुराणम्- mythological scripture, well known sacred works- अष्टादश पुराणां समाहार- द्विगु. स., व्यासस्य- पु. लिं. ष. वि. ए. व. of व्यासः - Vyas Maharshi, पुण्याय & पापाय- न. लिं. च. वि. ए. व. of पुण्यम्- holy or virtuous deed & पापम्-sin, evil act, एव- mere, just, only,

जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम्।
संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः॥१५५॥

-भर्तृहरि- (सुधर्मा)

सः कूर्मः एकः (एव) जातः येन पृथुभुवनभराय पृष्ठम् अर्पितम्। ध्रुवस्य जन्म श्लाघ्यम्, नियमितम् यत्र तेजस्विचक्रम् भ्रमति। अपरे संजातव्यर्थपक्षाः परहितकरणे (ध्रुववत्) न उपरिष्टात् (सन्ति), न च (कूर्मवद्) अधः (सन्ति)। (ते) जन्तवः ब्रह्माण्डोदुम्बरान्तर्मशकवत् जातनष्टाः (भवन्ति) ॥

That tortoise (Lord Vishnu in कूर्मावतार) is worthy of its birth, having carriedon its back the burden of entire earth (n ocean below). (Likewise) Birth of Dhruv is praiseworthy, around whom movement of shining Stars is regulated (in the sky above). Rest of the people, whose existence is wasted without doing any good to the others, are niether below (like that tortoise) nor above (like Dhruv). They are ruined at birth itself, like flies inside a fig-fruit, forming their world.

सः- (तद्)- he, कूर्मः- tortoise, एकः- one, alone, जातः- one who is worthy of birth, term of endearment- (जात- क. भू. धा. वि. of जन्- जायते ४ ग. आ. प. to be born)- all in पु. लिं. प्र. वि. ए. व., येन- in पु. लिं. तृ. वि. ए. व. of यद्-who, पृथुभुवनभराय- in पु. लिं. च. वि. ए. व. of पृथुभुवनभरः- one who bears burden of entire earth- पृथु- adjctv- expansive, great, mighty, भुवन- world, earth, भरः- load, burden- पृथु भुवनम्-वि. पू. प. क. धा. स. & पृथुभुवनस्य भरः- ष. तत्पुरुष स., पृष्ठम्- back, rear, surface or upper side, अर्पितम्- given- (अर्पित- प्रयोजक क. भू. धा. वि. of ऋ- अर्पयति- ऋ- ऋच्छति १ ग. प. प. to raise, obtain)- in न. लिं. द्व. वि. ए. व., ध्रुवस्य- in पु. लिं. ष. वि. ए. व. of ध्रुव- the North star- (personified in the mythology as son of Uttarpada), जन्म (जन्मन्)- birth, श्लाघ्यम्- praiseworthy- (श्लाघ्य- क. भू. धा. वि. of श्लाघ्- श्लाघ्यते १ ग. आ. प. to praise), नियमितम्- regulated, like down- (नियमित- प्रयोजक क. भू. धा. वि. of नि+ यम्-- नियमयति-ते)- all in न. लिं. प्र. वि. ए. व., तेजस्विचक्रम्- bright shining circle (of stars & planets)- तेजस्विन्- bright, shining, चक्रम्- circle, multitude- तेजस्विनाम् (ग्रहनक्षत्रादीनाम्) चक्रम् (मण्डलम्)- ष. तत्पुरुष स., भ्रमति- वर्त. तृ. पु. ए. व. of भ्रम्- to go about, roam, परहितकरणे- in न. लिं. स. वि. ए. व. of परहितकरणम्- doing good to others- पर- other, हित- good, beneficial- (क. भू. धा. वि. of हि- हिनोति ५ ग. प. प. to gratify, cast), करणम्- doing- परस्य हितम्- परहितम्- ष. तत्पुरुष स. & परहितम् करणम्- परहितकरणम्- द्वि. तत्पुरुष स., ब्रह्माण्डोदुम्बरान्तर्मशकवत्- like a fly inside the world of a fig ब्रह्माण्ड- the universe, world, उदुम्बर- fig fruit, अन्तर्- inside, मशकः- fly, वत्- अव्यय- prefix implies; like, similar to- ब्रह्माण्डः इव उदुम्बरः- ब्रह्माण्डोदुम्बरः- उपमान उ. प. क. स., ब्रह्माण्डोदुम्बरस्य अन्तर्- ब्रह्माण्डोदुम्बरान्तर्- ष. तत्पुरुष स. & ब्रह्माण्डोदुम्बरान्तरे स्थितः मशकः इति- ब्रह्माण्डोदुम्बरान्तर्मशकः- कर्मधारय स., अपरे, संजातव्यर्थपक्षाः, जन्तवः & जातनष्टाः- in पु. लिं. प्र. वि. ब. व. of अपरः- other, someone else, संजातव्यर्थपक्षः- one whose part of existence gone waste संजात- (सं+ जात)- having born, having become, व्यर्थ- adjctv- useless, vain, पक्षः- faction, part, side- संजातः व्यर्थः पक्षः यस्य सः- संजातव्यर्थपक्षः- बहुव्रीहि स., जन्तुः- a creature, living being & जातनष्टः- ruined at birth itself- जातः- born, नष्टः- destroyed, ruined- (क. भू. धा. वि. of क. भू. धा. वि. of नश्- नश्यति- ४ ग. प. प. to be lost)- जातः च नष्टः च यः सः- जातनष्टः- बहुव्रीहि स., यत्र- where, in which place, उपरिष्टात्- as an adverb it means; over, high above, later on, न- no, not, च- and, अधः (अधस्)- below, lower region all अव्ययs

आयुः कर्म च वित्तं च विद्या निधनमेव च।
पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः॥१५६॥ -चाणक्यनीति ४.१

देहिनः आयुः, कर्म च वित्तम् च विद्या, निधनम् एव च एतानि पञ्च गर्भस्थस्य एव हि सृज्यन्ते ॥

The following five items are created (written) for a man while he is in the womb of its mother- his life span, work, wealth, education and death.

देहिनः & गर्भस्थस्य- पु. लिं. ष. वि. ए. व. of देहिन्- living being, man, human & गर्भस्थः- while in the womb गर्भ- womb, act of conception- गर्भे तिष्ठति इति- गर्भस्थः- उपपद तत्पुरुष स., आयुः (आयुस्)- life, duration of life, कर्म (कर्मन्)- work, duty, वित्तम्- wealth, money & निधनम्- death, destruction- all in न. लिं. प्र. वि. ए. व., विद्या- knowledge, education, learning- in स्त्री. लिं. प्र. वि. ए. व., एतानि & पञ्च- both in न. लिं. प्र. वि. ब. व. of एतद्- this, it & पञ्चन्- five, सृज्यन्ते & विलिख्यन्ते- both कर्मणी प्रयोग प्र. पु. ब. व. of सृज्- सृजति ६. ग. प. प. to create, make & वि+ लिख्- to inscribe, implant- (लिख्- लिखति- ६ ग. प. प. to write) एव- just, mere, only, च- and, हि- indeed, surely- all अव्ययs

प्राप्तव्यमर्थं लभते मनुष्यो
देवोऽपि तं लङ्घयितुं न शक्तः।
तस्मान्न शोचामि न विस्मयो मे
यदस्मदीयं नहि तत्परेषाम् ॥१५७॥ - सुभाषित रत्नाकर (सुधर्मा)

मनुष्यः (तस्य) प्राप्तव्यम् (एव) अर्थम् लभते। देवः अपि तम् लङ्घयितुम् न शक्तः (अस्ति)। (अहम्) तस्मात् न शोचामि। मे विस्मयः (अपि) न (अस्ति)। यद् हि अस्मदीयम् (अस्ति) तद् (कदा अपि) परेषाम् न (भवति) ॥

A man gets whateveer he is destined to get. Even God is not capable of overcoming it. Therefore, I do not worry nor I am surprised about that. What is ours will never be others'.

मनुष्यः-a man, person, देवः- God, शक्तः- one who is capable of- (शक्त- क. भू. धा. वि. of शक्- शक्नोति ५ ग. प. प. to be able, capable of) & विस्मयः- wonder, astonishment- all in पु. लिं. प्र. वि. ए. व., प्राप्तव्यम्, अर्थम् & तम्- all in पु. लिं. द्वि. वि. ए. व. of प्राप्तव्यः- thing that is obtained- प्राप्तव्य (प्रापणीय & प्राप्य)- क. वि. धा. सा. वि. of प्र+ आप्- to get- (आप्- आप्नोति ५ ग. प. प. to get, attain), अर्थः- purpose, goal, wealth, meaning & तद्- that, he, लभते- वर्त. तृ. पु. ए. व. of लभ्- १ ग. आ. प. to get, receive, लङ्घयितुम्- तुमन्त हेत्वर्थक अव्यय of प्रयोजक लङ्घ् - लङ्घयति-ते- to violate, transgress- (लङ्घ्- लङ्घति- ते १ ग. उ. प. to leap), तस्मात्- therefore- पं. वि. ए. व. of तद्- that, it, शोचामि- वर्त. उ. पु. ए. व. of शुच्- शोचति १ ग. प. प. to worry, grieve, में (मह्यम्)- to me- च. वि. ए. व. of अस्मद्- I, यद्- which, what, अस्मदीयम्- belonging to us, तद्- that, it- all in न. लिं. प्र. वि. ए. व., परेषाम्- in पु. लिं. ष. वि. ब. व. of परः- other, someone else, अपि-also, even, न- no, not, हि- surely, indeed-all अव्ययs

उत्कन्धरो विततनिर्मलचारुपक्षो हंसोऽयमत्र नभसीति जनैः प्रतीतः ।
गृह्णाति पल्वलजलाच्छफरीं यदासौ ज्ञातस्तदा खलु बकोऽयमितीह लोकैः ॥१५८॥

-योगवासिष्ठ-६ उत्तरार्ध ११८.५

अयम्, अत्र नभसि, उत्कन्धरः विततनिर्मलचारुपक्षः, हंसः, इति जनैः प्रतीतः। यदा असौ पल्वलजलात् शफरीम् गृह्णाति, तदा अयम् इह बकः इति खलु लोकैः ज्ञातः (भवति) ॥

This bird with a long neck, clean, spread-out, beautiful wings in this sky over here was believed to be a swan by the people. However, when it catches a small glittering fish (शफरी-Shafaree) from puddle water, then only it is understood by the people that it is just a crane.

अयम् (इदम्)- he, this, उत्कन्धरः- one with long majestic neck- उद्- अव्यय- a prefix to verb or noun implies: expanding, powerful, pre- eminence, कन्धर- neck- उदग्र: कन्धर:- उत्कन्धरः- कर्मधारय स., विततनिर्मलचारुपक्षः- वितत- spread out, stretched- क. भू. धा. वि. of वि+ तन्- (तन्- तनोति- तनुते ८ ग. उ. प. to stretch), निर्मल- pure, stainless- मलम्- dirt, impurity- निर्गतम् मलम् इति- उपपद तत्पुरुष स., चारु- beautiful, pleasing, पक्ष- wing- विततः च निर्मलः च चारुः च- विततनिर्मलचारुः -विततनिर्मलचारू पक्षः- विततनिर्मलचारुपक्षः- कर्मधारय स., हंसः- swan, प्रतीतः- believed, perceived- क. भू. धा. वि. of प्रति+ इ- (इ- एति २ ग. प. प. to go), ज्ञातः- understood, realised- क. भू. धा. वि. of ज्ञा- जानाति- जानीते ९ ग. उ. प. to know), बकः- crane & असौ (अदस्)- he, this- all in पु. लिं. प्र. वि. ए. व., नभसि- in न. लिं. स. वि. ए. व. of नभस्- sky, जनैः & लोकैः- both in पु. लिं. तृ. वि. ब. व. of जनः- people & लोक- world, people, पल्वलजलात्- न. लिं. द्वि. वि. ए. व. of पल्वलजलम्- puddle water- पल्वलम्- a pond, puddle, जलम्- water- पल्वलस्य जलम्- पल्वलजलम्- ष. तत्पुरुष स., शफरीम्- in स्त्री. लिं. द्वि. वि. ए. व. of शफरी- a small glittering fish, गृह्णाति- वर्त. तृ. पु. ए. व. of ग्रह्- ९ ग. उ. प. to hold, catch, अत्र- here, at this place, इति- a particle quoting very word spoken: thus, in this way, खलु- indeed, surely, truly, इह- here, in this place, तदा- then, at that time & यदा- when, at which time- all अव्ययs

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥१५९॥ -भवभूतिरचित- उत्तररामचरित प्र. अ. १३

अस्याः उत्पत्तिपरिपूतायाः, किम् पावनान्तरैः (प्रयोजनम् अस्ति)। तीर्थोदकम् च वह्निः च अन्यतः शुद्धिम् न अर्हतः॥

(Said by Rama about Sita, after she proved her purity by the fire-test on returning from Lanka)

By which other means she needs to be sanctified when she was born pure at birth? Holy water and fire do not need to be (further) purified.

उत्पत्तिपरिपूतायाः & अस्याः- स्त्री. लिं. ष. वि. ए. व. of उत्पत्तिपरिपूता- one who is born in a purest form- उत्पत्तिः- स्त्री. लि.- production, birth, origin- (उद्+ पद्- to be born, produced- पद्- पद्यते ४ ग. आ. प. to go, move), परिपूत- absolutely pure- क. भू. धा. वि. of परि+ पू- (पू- १ & ४ आ. प.- पवते, पूयते & ९ उ. प. पुनाति- पुनीते- to make pure)- उत्पत्तौ (उत्पत्त्याम्) परिपूता - उत्पत्तिपरिपूता- सप्तमी तत्पुरुष स. & इदम्- she, पावनान्तरैः- न. लिं. तृ. वि. ब. व. of पावनान्तरम्- by other means of purification- पावन- adjctv- purification, sanctifying, अन्तरम्- adjctv- other, different - अन्तरम् पावनम् - वि.उ. प. कर्मधारय - पावनान्तरम् स., तीर्थोदकम्- holy water- न. लिं. प्र. वि. ए. व.- तीर्थ- holy place or water, an object of

veneration, उदकम्- water- तीर्थस्य उदकम्- तीर्थोदकम्- ष. तत्पुरुष स., वह्निः- पु. लिं. प्र. वि. ए. व.- fire, अन्यतः- adverb- from another, by the other- (अन्य- adjctv- other, another, different & तः (तस्)- suffix implies: from, by, of that), शुद्धिम्- स्त्री. लिं. द्वि. वि. ए. व. of शुद्धिः- purificatory rite, purification, atonement, अर्हतः- वर्त. प्र. पु. द्वि. व. of अर्ह्- अर्हति- १ ग. प. प. to warrant, deserve, merit, to be worth, किम्- a particle of interrogation: why, what, what for, च and, न- no, not- all अव्ययs

एकेन हि सुवृक्षेण पुष्पितेन सुगंधिना । वासितं तद्वनं सर्वं सुपुत्रेण कुलं यथा॥१६०अ॥

एकेन शुष्कवृक्षेण दह्यमानेन वह्निना। दह्यते तद्वनं सर्वं कुपुत्रेण कुलं यथा॥१६०ब॥

- चाणक्यनीति अ. ३. श्लोक १४ & १५

(अ) यथा एकेन हि सुगंधिना पुष्पितेन सुवृक्षेण तद् वनम् सर्वम् वासितम् (भवति तथा एकेन हि), सुपुत्रेण कुलम् (ख्यातिम् आप्नोति) ॥

(ब) यथा वह्निना दह्यमानेन एकेन (हि) शुष्कवृक्षेण तद् वनम् सर्वम् दह्यते, (तथा एकेन) कुपुत्रेण कुलम् (विनाशम् प्राप्नोति) ॥

(A) Just as a single beautiful tree, blooming with fragrant flowers, makes an entire forest full of scent, a good son brings good name to his entire family.

(B) Just like a single parched dry tree, burning in flames, burns out an entire forest, a bad son brings disgrace to his entire family.

तद्- that, वनम्- forest, सर्वम्- pron. adjctv- all, entire, कुलम्- family, race & वासितम्- scented, fragrant ,perfumed- (वासित- क. भू. धा. वि. of वास्- वासयति-ते १० ग. उ. प. to scent, make fragrant)- all in न. लिं. प्र. वि. ए. व., एकेन, सुवृक्षेण, पुष्पितेन, सुगंधिना, शुष्कवृक्षेण & दह्यमानेन- all in न. लिं. तृ. वि. ए. व. of एकम्- one, single, सुवृक्षम्- a beautiful tree- वृक्षम्- tree- - शोभनम् गन्धम्- सुगन्धम्, सुन्दरम् वृक्षम्- सुवृक्षम्- both प्रादि कर्मधारय स., पुष्पितम्- bloomed, flowered- क. भू. धा. वि. of पुष्प्- पुष्प्यति ४ ग. प. प. to bloom, open, सुगंधिन्- one which is fragrant, शुष्कवृक्षम्- parched up dry tree- शुष्क- parched, dried up- क. भू. धा. वि. of शुष्- शुष्यति ४ ग. प. प. to be dry, parched up, शुष्कम् वृक्षम्- वि. पू. प. क. स. & दह्यमानम्- burning- दह्यमान- वर्त. का. वा. धा. सा. वि. of दह्- दहति १ ग. प. प. to burn, सुपुत्रेण, कुपुत्रेण- & वह्निना- all in पु. लिं. तृ. वि. ए. व. of सुपुत्रः- a good son- शोभन: पुत्रः- सुपुत्रः & कुपुत्रः- a bad son- कुत्सितः पुत्रः- कुपुत्रः- both प्रादि कर्मधारय स. & वह्निः- fire, दह्यते- कर्मणि प्रयोग प्र. पु. ए. व. of दह्- see above, यथा- like which, how & हि- surely, indeed, merely- both अव्ययs